# संस्कृत सोपानम्

भाग 3



# संस्कृत सोपानम्

**भाग 3**




लेखक

**डॉ० सुरेन्द्र गम्भीर**

एम० ए० (संस्कृत, भाषा-विज्ञान)
साहित्यशास्त्री, पी-एच०डी०
भू०पू० अध्यक्षः, संस्कृत विभागः
मॉडर्न स्कूल, नई दिल्ली



## पीताम्बर पब्लिशिंग कम्पनी प्रा० लि०

888, ईस्ट पार्क रोड, करौल बाग़, नई दिल्ली-110 005 (भारत)

---

शाखाएँ

बैंगलोर : आवास न० 6/2, III मेन रोड, एस०के० गार्डेन, बेन्सन टाउन पोस्ट, बैंगलोर-560046 दूरभाष : 080-23534673

चेन्नई : 10, हंटर्स रोड, प्रथम तल, चुलाई, चेन्नई-600112 दूरभाष : 044-25322333

हैदराबाद : ए जी-18, शांति बाग अपार्टमैंट्स, बेगमपेट, हैदराबाद-500016 दूरभाष : 040-23737423

जयपुर : 113, इंद्रा कालोनी, बनी पार्क, जयपुर-302016 दूरभाष : 0141-2203440

प्रकाशक :
**पीताम्बर पब्लिशिंग कम्पनी प्रा॰ लि॰**
888, ईस्ट पार्क रोड, करौल बाग़, नई दिल्ली-110 005 (भारत)
दूरभाष : 23670067, 23522997, 23625528
फैक्स : 91-11-23676058, 91-11-25765754
ई-मेल : pitambar@bol.net.in

**संस्करण** : प्रथम, 1972
पुनर्मुद्रण, 1973, 1974, 1975
द्वितीय, 1976
पुनर्मुद्रण, 1976, 1977, 1978, 1979, 1980, 1981, 1982
तृतीय, 1983
पुनर्मुद्रण, 1984, 1985, 1986, 1987, 1988, 1989, 1990, 1991
चतुर्थ, 1992
पुनर्मुद्रण, 1993, 1994, 1995
पंचम, 1996
पुनर्मुद्रण, 1997, 1998, 1999, 2000
संशोधित एवं परिमार्जित संस्करण, 2001
पुनर्मुद्रण : 2002, 2003

**प्रिय ग्राहक**
आपको जाली/नकली पुस्तकों से बचाने के लिए हमने इस पुस्तक में यह होलोग्राम चिपकाया हुआ है । यदि यह होलोग्राम यहाँ नहीं है तो कृपया पुस्तक को न खरीदें क्योंकि यह जाली/नकली हो सकती है । अगर आपको बिना होलोग्राम कोई पुस्तक प्राप्त हों तो कृपया हमें सूचित करें ।
**प्रकाशक**

**सर्वाधिकार** : © सुरक्षित

**कोड नं.** : 12632

**ISBN** : 81-209-0548-2

मूल्य : 63/- रुपये

**आवरण :** (1) महाकवि कालिदास शकुन्तला की रचना करते हुए । (2) जर्मन विद्वान मैक्सम्यूलर — जिन्होंने संस्कृत ग्रंथों का अनुवाद जर्मन भाषा में किया तथा गीता-उपदेश का चित्र ।

**इस पुस्तक पर आधारित अभ्यास – पुस्तिका भी प्राप्य है।**

पीयूष प्रिंटर्स पब्लिशर्स प्रा॰ लि॰, नई दिल्ली-41 द्वारा मुद्रित ।

# किञ्चित्



प्रस्तुतमाला-विषयकम्

भाषा-मनोविज्ञान-शास्त्रिणां शोधैः भाषा-शिक्षणमपि कला-रूपेण उपस्थापितम् । अल्पादपि अल्पतरे समये अधिकस्य शिक्षणस्य स्पर्धा सर्वत्र दृष्टिपथमवतरति । कस्या अपि भाषायाः शिक्षणस्य चतस्रः विधा भवन्ति, तथाहि-श्रवणं, वदनं, पठनं लेखनञ्चेति । परं संस्कृत-सदृश्यै भाषायै पठनं तदवगमश्चैव प्राधान्येन लक्ष्यीकृतं स्याद् इत्यस्ति व्यवस्थिता मनीषा भाषा-शास्त्र-विदाम् । गौणरूपेण पठनविधायाः साधनरूपेण वदनादि-विधा अपि अनुशील्यन्ताम् । सत्यमेतत् यत् भाषा-भाषणेन छात्राणां विश्वासो वर्धते रुचिश्चापि वृद्धिं गच्छति । एतद् विचार्यैव अत्र ललितानि संस्कृत-पद्यानि, दैनन्दिन-व्यवहार-पराणि कानिचित् सरल-संस्कृत-वाक्यानि च पुस्तकारम्भे दत्तानि । अनुदिनम् एतेषाम् अनुशीलनेन छात्राणां संस्कृत-भाषां प्रति अनुरक्तिर्वर्धिष्यते इत्याशासे । भाषा-शिक्षण-विधानां प्रधान्य-गौण-व्यवस्थाया विस्मरणं न भवेत् इत्यावश्यकम् । लक्ष्ये स्पष्टे पन्था अपि स्पष्टो जायते ।

प्रत्येकं पुस्तकं छात्रस्य आयुस्स्तरमावश्यकताञ्च विलोक्यैव प्रणीतम् । भाषा-ज्ञान-भित्तिः आदित एवं दृढमूला सुसंहता च भवेदिति दृशा सर्वमत्र क्रमिकं मितं नियतञ्चास्ति । प्रत्येकं शब्दः कयापि योजनयैव सन्निवेशितः । प्रस्तुत-मालायां शब्दा इत्थं प्रयुक्ताः, वाक्य-रचना एवमायोजिता व्याकरणञ्चेत्थं क्रमेण अल्पाल्पशः गुम्फितं येन बालः सारल्यैनैव सर्वं शिक्षेत । क्रमिक-शिक्षणं क्रमिक-विकासाय आवश्यकम् । भाषा-शिक्षणेन साकं साहित्यस्य रुचिरा ललिताश्चांशाः सन्निवेशिताः । संस्कृत-वाङ्मय-महोदधि मंथनोत्थानि कथा-रत्नानि पद्य-रत्नानि निदर्शन-भूतानि चात्र गुम्फितानि । अन्यच्च, विज्ञान-संस्कृति-सामाजिक-ज्ञानादि-विषयान् अन्तरेण पाठा अपि चात्र सन्निविष्टा सन्ति ।



प्रत्येकं पाठस्योपरि पाठ्य-संकेतेन पाठे यदुद्दिष्टं तदवगमे सौकर्यं भविष्यति । सन्धीनां समासानां चाप्रयोगः सारल्यनिमित्तकः । पुस्तकस्यान्ते दत्तश्शब्दकोशः बालान् शब्दकोशस्यानुशीलनाय प्रवर्तयिष्यते । पाठेभ्यः व्यतिरिक्तमभ्यासेष्वपि अन्ये प्ररोचकाः बुद्ध्युत्तेजकाः प्रयोगाः प्रश्नाश्च दत्ताः ।

वस्तुस्थितिरियं यत् न वयं छात्रेषु बहु आशास्महे । शिक्षाविदां तर्कानुभवानुमोदितं वचः यत् यावत छात्रेषु सम्भाव्यते तावत्येव ते कृत-प्रयत्नाः भवन्तीति शम् ।

–गम्भीरः

# विषय सची


| पाठः | | पृष्ठः |
|---|---|---|
| प्रथमः | ईश्वर-वंदना | 1 |
| द्वितीयः | सिंहः मूषकः च | 5 |
| तृतीयः | हिमालय | 9 |
| चतुर्थः | स्वास्थ्यस्य रक्षा | 13 |
| पंचमः | क्रीडायाः क्षेत्रम् | 17 |
| षष्ठः | त्रयः मत्स्याः | 21 |
| सप्तमः | श्रीरामः | 25 |
| अष्टमः | जन्तुशाला | 29 |
| नवमः | नलः दमयन्ती च | 33 |
| दशमः | गर्दभस्य गीतम् | 37 |
| एकादशः | बुद्धः | 40 |
| द्वादशः | मूषकः महर्षिः च | 44 |
| त्रयोदशः | आचार्यः चाणक्यः | 48 |
| चतुर्दशः | श्लोकाः | 52 |
| पंचदशः | गीतायाः उपदेशः | 55 |
| षोडशः | स्वदेश-परिचयः | 59 |
| सप्तदशः | संस्कृत भाषा | 63 |
| अष्टादशः | रमेशस्य-जन्मदिवसः | 67 |
| नवदशः | लोभस्य परिणामः | 71 |
| विंशतितमः | चन्द्रयात्रा | 75 |
| एकविंशतितमः | श्लोकाः | 79 |
| द्वाविंशतितमः | त्रयः दकाराः | 83 |
| त्रयोविंशतितमः | विवेकानन्दः | 87 |
| चतुर्विंशतितमः | पत्रम् पितरं प्रति | 91 |
| | व्याकरणम् | 94 |
| | शब्द-कोशः | 110 |

*Teaching Point :*

(i) वर्ण सम्मेलनम्

(ii) 'साधु' declension

# प्रथमः पाठः

# ईश-वन्दना

**सखा द्रविणम् संकेतः सकल भानुः तप् विधुः तरुः फल् कल्याणम्**

त्वमेव माता च पिता त्वमेव,
त्वमेव बन्धुः च सखा त्वमेव ।
त्वमेव विद्या द्रविणम् त्वमेव,
त्वमेव सर्वम् मम देव-देव ।



हे ईश्वर ! त्वम् दयालुः असि । त्वम् कृपालुः असि । त्वम् गुरूणामपि गुरुः । साधवः अपि त्वामेव अर्चन्ति ।

तव संकेतेन एव सकलानि कार्याणि चलन्ति । भानुः तव आज्ञया तपति । विधुः अपि तव संकेतम् पालयति । हे प्रभो ! वायुः अपि तव आज्ञाम् विना न चलति । तरवः अपि तव कृपया एव फलन्ति ।

हे ईश्वर ! त्वम् भक्तान् रक्षसि दुष्टान् च दण्डयसि । अस्मभ्यम् विद्याम् यच्छ । अस्माकम् मतिः शक्तिः च देशस्य कल्याणाय भवतु ।

वयम् त्वाम् नमामः ।



## शब्दार्थाः

| | | | |
|---|---|---|---|
| माता | = | माता | (mother) |
| पिता | = | पिता | (father) |
| बन्धुः | = | सम्बन्धी | (relative) |
| सखा | = | मित्र | (friend) |
| विद्या | = | ज्ञान | (knowledge) |
| द्रविणम् | = | धन | (wealth) |
| देव-देव | = | हे देवताओं के देवता | (Oh God of gods) |
| हे | = | हे | (oh !) |
| दयालु | = | दयावान् | (merciful) |
| कृपालु | = | कृपा करने वाला | (kind) |
| गुरुः | = | आचार्य | (teacher) |
| साधुः | = | साधु | (saint) |
| संकेतः | = | इशारा | (hint, signal) |
| सकल | = | सारा | (all) |
| भानुः | = | सूर्य | (sun) |
| तप् | = | तपना | (to shine) |

| | | | |
|---|---|---|---|
| विधुः | = | चन्द्रमा | (moon) |
| प्रभुः | = | ईश्वर | (God) |
| वायुः | = | हवा | (air) |
| तरुः | = | पेड़ | (tree) |
| फल् | = | फलना | (to bear fruit) |
| कल्याणम् | = | भला | (welfare, good) |

**धातव** : तप् (2), फल् (2)

**रूपाणि**

बन्धु, दयालु, कृपालु, गुरु, भानु, विधु, प्रभु, वायु, तरु–'**साधु**' के समान (पृष्ठ 94)

**विशेषणानि**

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| दयालुः | दयालुः | दयालु |
| कृपालुः | कृपालुः | कृपालु |
| सकलः | सकला | सकलम् |

**अव्यय** : हे

**विशेष** : वाक्य के अन्त में 'अस्' धातु के रूपों का प्रयोग वैकल्पिक है (At the end of a sentence, use of अस् form is optional).

## अभ्यासः

**मौखिकम्**

1. '**भानु**' शब्द के रूपों को बोलिए (Decline भानु) ।
2. निम्नलिखित शब्दों को मिला कर बोलिए (Join and pronounce the following words)—
   त्वम् + एव, त्वम् + असि, त्वम् + अपि, द्रविणम् + अपि, कल्याणम् + अस्ति ।

**लिखितम्**

3. निम्नलिखित शब्दों के **तृतीया एकवचन और षष्ठी बहुवचन में** रूप लिखिए (Give forms of each in तृतीया singular and षष्ठी plural)—

| | | |
|---|---|---|
| बन्धु | ........................ | ........................ |
| गुरु | ........................ | ........................ |
| भानु | ........................ | ........................ |
| विधु | ........................ | ........................ |

प्रभु ........................ ........................
वायु ........................ ........................
तरु ........................ ........................

4. वर्णों को मिलाकर निम्नलिखित शब्दों को दोबारा लिखिए (Join and rewrite the following words)—
गुरूणाम् + एव, आज्ञाम् + अपि, द्रविणम् + अस्ति, अभिधानम् + आसीत्, आक्रमणम् + अभवत् ।

5. प्रत्येक का एक पर्यायवाची दीजिए (Give one synonym of each)—
पिता, भानुः, ईश्वरः, तरुः, गुरुः, विद्या ।

6. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
(क) साधु आश्रमों में रहते थे । (Sadhus lived in hermitages.)
(ख) सूर्य और चन्द्रमा ईश्वर की आज्ञा से प्रकाश देते हैं । (Sun and moon give light by obeying God's order.)
(ग) हम सब मिलकर प्रभु को नमस्कार करते हैं । (All of us together bow to God.)
(घ) हम गुरुओं की पूजा करें । (We should worship teachers.)
(ङ) रमेश, तुम धन चाहते हो या विद्या ? (Ramesh, do you want money or knowledge ?)



*Teaching Point :*

(i) 'एक' declension

(ii) भूतकालिक-प्रयोग : -review

द्वितीयः पाठः

# सिंहः मूषकः च

**मूषकः सुप्त इतस्ततः कूर्द् प्रबुद्ध मुच् (मुञ्च्) व्याधः सद् (सीद्) कृत् क्षुद्र**



एकस्मिन् वने एकः सिंहः वसति स्म । एकदा सः वृक्षस्य नीचैः सुप्तः आसीत् । एकः मूषकः आगत्य तस्य शरीरे इतस्ततः अनृत्यत् । तेन सिंहः प्रबुद्धः अभवत् । सः मूषकाय अक्रुध्यत् । सः मूषकः अक्रन्दत् अवदत् च–"भोः वनराज, मयि दयाम् कुरु । समये अहमपि तव सहायताम् करिष्यामि" इति । एतत् आकर्ण्य सिंहः अहसत् परम् दयया तम् अमुञ्चत् ।



एकदा सिंहः व्याधस्य जालेन बद्धः अभवत् । तदा सः अगर्जत् । तस्य गर्जनम् आकर्ण्य मूषकः तत्र आगच्छत् अवदत् च—"भोः वनराज, मा सीद । अहम् एतत् जालम् कर्तिष्यामि" इति । तदा सः मूषकः तत् जालम् अकृन्तत् । सिंहः स्वतन्त्रः अभवत् । प्रसन्नः भूत्वा सः अवदत्—"भोः मित्र मूषक, अहम् प्रसन्नः अस्मि । क्षुद्रस्य जन्तोः अपि उपयोगः भवति, एतत् अहम् अद्य अवगच्छामि" इति ।

### शब्दार्थाः

| | | | |
|---|---|---|---|
| मूषकः | = | चूहा | (mouse) |
| स्म | = | *(वर्तमान काल की क्रिया के पीछे लगा कर भूतकाल बनाने वाला निपात)* | *(past-tense-maker particle, added after* present tense form) |
| सुप्त | = | सोया हुआ | (asleep) |
| शरीरम् | = | शरीर | (body) |
| इतस्तत | = | इधर-उधर | (here and there) |
| प्रबुद्धः | = | जागा हुआ | (awake) |
| इति | = | *(वक्ता के कथन के बाद प्रयुक्त)* | *(used to report the* direct speech) |

| | | | |
|---|---|---|---|
| दया | = | दया | (mercy) |
| सहायता | = | मदद | (help) |
| मुच् (मुञ्च्) | = | छोड़ना | (to leave) |
| व्याधः | = | शिकारी | (hunter) |
| जालम् | = | जाल | (net) |
| बद्ध | = | बँधा हुआ | (captured) |
| गर्जनम् | = | दहाड़ | (roar) |
| सद् (सीद्) | = | दु:खी होना | (to be dejected) |
| कृत् (कृन्त्) | = | काटना | (to cut) |
| क्षुद्र | = | छोटा | (small) |
| जन्तुः | = | प्राणी | (creature) |
| उपयोगः | = | उपयोग | (use) |

**धातवः**

मुच् (मुञ्च्) (2), सद् (सीद्) (2), कृत् (कृन्त्) (2)

**रूपाणि**

एक (पृष्ठ 97), जन्तु–'साधु' के समान (like साधु) (पृष्ठ 94)

**विशेषणानि**

| पु० | स्त्री० | नपुं० |
|---|---|---|
| सुप्तः | सुप्ता | सुप्तम् |
| प्रबुद्धः | प्रबुद्धा | प्रबुद्धम् |
| बद्धः | बद्धा | बद्धम् |
| क्षुद्रः | क्षुद्रा | क्षुद्रम् |

**अव्ययाः** स्म, इतस्ततः

**विशेषः**

(i) पाठ के अन्तिम वाक्य में 'एतत्' शब्द नपुंसकलिंग का रूप है । यहाँ नपुंसकलिंग क्यों आया ? उत्तर है–"सामान्ये नपुंसकम्" अर्थात् कोई विशेष लिंग अभिप्रेत न हो तो नपुंसकलिंग का प्रयोग होता है । (In the last sentence of the lesson, the neuter form of एतत् is used. Why neuter here? In Sanskrit Grammar, there is a rule सामान्ये नपुसंकम् which means neuter gender should be used when no particular gender is intended.)

(ii) स्पष्ट ही है कि एक के रूप केवल एकवचन में ही होंगे (It should be obvious that the word एक will have forms in singular only).

## अभ्यासः

### मौखिकम्

(1) 'एक' शब्द के रूप बोलिए (Decline एक) ।

(2) निम्नलिखित की 'स्म' की सहायता से भूतकालिक क्रियाएँ बनाइए (Make past tense forms with स्म)—
क्रुध्यति, गच्छति, कृन्तति, वदसि, स्मरन्ति, मुञ्चतः, तपामि, फलथ ।

### लिखितम्

(3) विशेषणों का उचित रूप बताएँ (Give the appropriate form of each adjective)—
(स्व) पुस्तकम्, (सुप्त) शावकौ, (बद्ध) नराः, (सकल) नायकान्, (प्रबुद्ध) बालकेभ्यः, (क्षुद्र) जन्तवे ।

(4) अव्यय छाँटिए (Choose अव्यय words)—
अनुशासनम्, इतस्ततः, आवश्यक, आसीत्, नीचैः, हे, भोः, परस्परम्, अभिधानम् ।

(5) संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
(क) यह कथा प्रसिद्ध है । (This story is famous.)
(ख) एक वन में शेर और चूहा रहते थे । (In a forest lived a lion and a mouse.)
(ग) यह फल एक बालक के लिए है । (This fruit is for one boy.)
(घ) यह काम एक आदमी का नहीं है । (This work is not of one person.)
(ङ) नौकर ठंडा पानी लाता था । (The servant used to bring cold water.) □□



*Teaching Point :*

(i) 'नदी' declension

तृतीयः पाठः

# हिमालयः

**शिखरम् सर्वदा हिमम् आच्छादित निर+गम् यथा वेगः सिच् (सिञ्च्) रुग्ण तापः प्र+सद् पुरा प्रकृति संसक्तलोचन**



हिमालयः भारतस्य उत्तरदिशायाम् स्थितः अस्ति । एषः पर्वतराजः अस्ति । हिमालयस्य शिखराणि अति उन्नतानि सन्ति । तानि सर्वदा हिमेन आच्छादितानि भवन्ति ।

हिमालयात् नद्यः निर्गच्छन्ति, यथा–गंगा, यमुना, शतद्रुः विपाशा, इरावती, चन्द्रभागा, वितस्ता च इति । हिमालये नदीनाम् वेगः अति तीव्रः भवति । ताभिः नदीभिः कृषकाः क्षेत्राणि सिञ्चन्ति ।

अत्र स्वास्थ्य-वर्धकानि स्थानानि अपि सन्ति । रुग्णाः तत्र गच्छन्ति स्वास्थ्यम् च विन्दन्ति । तापेन व्याकुलाः जनाः अत्र आगत्य प्रसीदन्ति ।

पुरा हिमालयस्य गुहासु मुनयः वसन्ति स्म । तत्र नदीषु स्नानं कृत्वा ते ईश्वरम् अर्चन्ति स्म ।



एषः पर्वतः प्रकृतेः क्रीडा-स्थलम् । काश्मीर-प्रदेशः अपि अत्र एव स्थितः । एतस्मिन् प्रदेशे शत्रुः संसक्त-लोचनः अस्ति । शत्रुभ्यः वयम् काश्मीरम् हिमालयम् च रक्षिष्यामः ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| उत्तर दिशा | = | उत्तरी दिशा | (northern direction) |
| पर्वतराजः | = | पर्वतों का राजा | (king of mountains) |
| शिखरम् | = | चोटी | (peak) |
| अति | = | बहुत | (very) |
| उन्नत | = | ऊँचा | (high) |
| सर्वदा | = | हमेशा | (always) |
| हिमम् | = | बर्फ़ | (snow) |
| आच्छादित | = | ढका हुआ | (covered) |
| नदी | = | नदी | (river) |
| निर्+गम् (गच्छ्) | = | निकलना | (to go out) |
| यथा | = | जैसे | (as for example) |

| | | | |
|---|---|---|---|
| शतद्रुः | = | सतलुज नदी | (the river Satluj) |
| विपाशा | = | ब्यास नदी | (the river Beas) |
| इरावती | = | रावी नदी | (the river Ravi) |
| चन्द्रभागा | = | चनाब नदी | (the river Chanab) |
| वितस्ता | = | जेहलम नदी | (the river Jhelum) |
| वेगः | = | प्रवाह | (current) |
| तीव्र | = | तेज़ | (fast) |
| सिच् (सिञ्च्) | = | सींचना | (to irrigate) |
| स्वास्थ्यवर्धक | = | स्वास्थ्य बढ़ाने वाला | (healthy, health-promoting) |
| स्थानम् | = | स्थान | (place) |
| रुग्ण | = | रोगी | (sick) |
| स्वास्थ्यम् | = | सेहत | (health) |
| तापः | = | गर्मी | (heat) |
| जनः | = | आदमी, लोग | (person, people) |
| प्र+सद् (सीद्) | = | प्रसन्न होना | (to be pleased) |
| पुरा | = | प्राचीनकाल में | (in olden days) |
| स्नानम् | = | स्नान | (bath) |
| पर्वतः | = | पहाड़ | (mountain) |
| प्रकृतिः | = | कुदरत | (nature) |
| क्रीडा-स्थलम् | = | क्रीडा-स्थल | (playing ground) |
| शत्रुः | = | दुश्मन | (enemy) |
| संसक्त-लोचन | = | आँखें गढ़ाए हुए | (one with eyes fixed) |

**धातु :** सिच् (सिञ्च्) (2)

**उपसर्गयुक्त धातु :** निर्+गम् प्र+सद् (सीद्)

**रूपाणि**

नदी (पृष्ठ 94), शत्रु–'साधु' के समान (like साधु) (पृष्ठ 94)

**विशेषणानि**

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| उन्नतः | उन्नता | उन्नतम् |
| आच्छादितः | आच्छादिता | आच्छादितम् |

| | | |
|---|---|---|
| तीव्रः | तीव्रा | तीव्रम् |
| –वर्धकः | –वर्धिका | –वर्धकम् |
| रुग्णः | रुग्णा | रुग्णम् |
| –लोचनः | –लोचना | –लोचनम् |

**अव्ययाः**

अति, सर्वदा, यथा, पुरा ।

## अभ्यासः

**मौखिकम्**

(1) 'नदी' शब्द के रूप बोलिए (Decline नदी) ।

(2) निम्नलिखित नदियाँ भारत के किस-किस प्रदेश में हैं ? In which states are the following rivers—
गंगा, यमुना, शतद्रु, विपाशा, इरावती, चन्द्रभागा, वितस्ता

**लिखितम्**

(3) कोष्ठक में दिए धातु से उचित रूप बनाइए (Fill in the blanks with appropriate forms of the roots within parenthesis) —
   (क) भारतस्य नद्यः क्षेत्राणि ........................ (सिच्) ।
   (ख) विद्यालयम् गन्तुम् बालाः गृहेभ्यः ................ (निर्+गम्) ।
   (ग) काश्मीरम् गत्वा जनाः .................. (प्र+सद्) ।

(4) निम्नलिखित शब्दों को संस्कृत-वाक्यों में प्रयुक्त कीजिए (Use the following words in Sanskrit sentences)
नदी, इरावती, स्वास्थ्यम्, प्रकृतिः, यथा

(5) संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
   (क) क्या नदियों में जल नहीं है ? (Is there no water in the rivers?)
   (ख) एक नदी का नाम इरावती है । (One river's name is Iravati.)
   (ग) प्राचीनकाल में गुफ़ाओं में मुनि रहते थे । (In olden days, sages lived in caves.)
   (घ) रोगी लोग कहाँ जाएँ ? (Where should sick people go ?)
   (ङ) साधु नदियों से जल लाते हैं । (Sadhus bring water from rivers.)
   (च) हम संस्कृत नागरी में लिखते हैं । (We write Sanskrit in Nagari.) □□

*Teaching Point :*

(i) विधिलिङ्

# चतुर्थः पाठः — स्वास्थ्यस्य रक्षा

**अर्ज् उत्+नी (नय्) तथाहि प्राक् प्रातर्विधिः ततः दन्तः धावनम् शोधकम् यथाशक्ति किञ्च अपरम् खाद्यम् मुहुर्मुहुः शयनम्**



प्राचार्यः —सर्वत्र जनाः सुखम् वाञ्छन्ति । शरीरेण स्वस्थाः जनाः एव सुखम् अधिगन्तुम् सफलाः भवन्ति । स्वस्थाः जनाः एव पठितुम् क्रीडितुम् च समर्थाः भवन्ति । स्वस्थाः धनम् अर्जन्ति । ते एव देशम् उन्नयन्ति ।

एकः छात्रः —स्वास्थ्यस्य रक्षायै वयम् किम् कुर्याम ?

प्राचार्यः —मोहन, उपविश । उपायान् अपि वदिष्यामि । तथाहि—जनः सदा सूर्योदयात् प्राक् उत्तिष्ठेत् । प्रातर्विधिम् कृत्वा व्यायामम् कुर्यात् । व्यायामेन शरीरस्य शक्तिः वृद्धिम् गच्छति । ततः दन्तानाम् धावनम् कृत्वा स्नानम् कुर्यात् । स्नानाय स्वच्छम् जलम् आवश्यकम् अस्ति । शोधकस्य प्रयोगम् प्रतिदिनम् न कुर्यात् । ततः निर्मलानि वस्त्राणि धारयेत् ।

सुनीलः –किम् वृद्धाः अपि व्यायामम् कुर्युः ?



प्राचार्यः –आम्, ते अपि यथाशक्ति व्यायामम् कुर्युः । किञ्च, जनाः ईश्वरम् अपि अर्चेयुः । तेन हृदयम् शुद्धम् भवति । शुद्धम् हृदयम् अपि स्वास्थ्याय आवश्यकम् ।

अपरम् च–

जनाः स्वास्थ्य-वर्धकानि खाद्यानि एव खादेयुः । मुहुर्मुहुः न खादेयुः ।

भोः छात्राः, यूयम् अपि समये एव पठेत, समये एव च क्रीडेत । समये एव शयनम् कुर्यात । समये एव च उत्तिष्ठेत । समये एव कार्याणि कृत्वा जनः स्वास्थ्यम् विन्दति ।

### शब्दार्थाः

| | | | |
|---|---|---|---|
| रक्षा | = | रक्षा | (protection) |
| सुखम् | = | सुख | (comfort) |
| समर्थ | = | योग्य | (capable) |
| अर्ज् | = | कमाना | (to earn) |
| उत्+नी (नय्) | = | उन्नत करना | (to uplift) |
| उपायः | = | उपाय | (device) |
| तथाहि | = | जैसे | (for example) |

| | | | |
|---|---|---|---|
| सूर्योदयः | = | सूर्य निकलना | (sunrise) |
| प्राक् | = | पहले | (before) |
| प्रातर्विधिः | = | शौचादि | (bathroom activity) |
| व्यायामः | = | कसरत | (exercise) |
| ततः | = | उसके बाद | (thereafter) |
| दन्तः | = | दाँत | (tooth) |
| धावनम् | = | सफ़ाई | (cleaning) |
| स्वच्छ | = | साफ़ | (clean) |
| शोधकम् | = | साबुन | (soap) |
| प्रयोगः | = | प्रयोग | (use) |
| निर्मल | = | साफ़ | (clean) |
| वृद्ध | = | बूढ़ा | (old) |
| यथाशक्ति | = | ताकत के अनुसार | (according to capacity ) |
| किञ्च | = | और | (and) |
| शुद्ध | = | शुद्ध | (pure) |
| अपरम् | = | (इसके इलावा) और | (moreover) |
| खाद्यम् | = | खाने योग्य वस्तु | (eatable) |
| मुहुर्मुहुः | = | बार-बार | (again and again) |
| शयनम् | = | सोना | (sleeping) |

धातु : अर्ज् (1)

उपसर्ग-युक्त-धातु :

उत्+नी (नय्)

विशेषणानि

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| समर्थः | समर्था | समर्थम् |
| स्वच्छः | स्वच्छा | स्वच्छम् |
| निर्मलः | निर्मला | निर्मलम् |
| वृद्धः | वृद्धा | वृद्धम् |
| शुद्धः | शुद्धा | शुद्धम् |

अव्ययाः

(क) तथाहि, प्राक्, ततः, किञ्च, अपरम्, मुहुर्मुहुः ।

(ख) यथाशक्ति ।

## अभ्यासः

### मौखिकम्

1. पठ् और अर्ज् धातुओं के विधिलिङ में रूप बोलिए (Conjugate पठ् and अर्ज् in विधिलिङ्) ।

2. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—

(क) जनाः किम् वाञ्छन्ति ? (ख) किम् जनाः मुहुर्मुहुः खादेयुः ? (ग) किम् वृद्धाः अपि व्यायामम् कुर्युः ? (घ) किम् बालकाः देशम् उन्नयेयुः ?

### लिखितम्

3. पढ़े हुए शब्दों के आधार पर 'मम शरीरम्' विषय पर संस्कृत में आठ वाक्य लिखिए (Making use of the known vocabulary, write eight sentences in Sanskrit on मम शरीरम्)।

4. इन शब्दों की सहायता से रिक्त स्थानों की पूर्ति कीजिए (Fill in the blanks with the help of following words)—

प्रयोगः, निर्मलम्, शुद्धम्, प्राक्

(क) त्वम् .............. वस्त्रम् धारयेः । (ख) यूयम् सदा सूर्योदयात् .............. उत्तिष्ठेत । (ग) ईश-वन्दनया हृदयम् .............. भवति । (घ) शोधकस्य .............. प्रतिदिनम् आवश्यकः न अस्ति ।

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

(क) छात्र शक्ति के अनुसार पढ़ें । (Students should study according to their capability.)

(ख) लोग अपने शरीरों को स्वस्थ रखें । (People should keep their bodies healthy.)

(ग) किसान खेतों को पानी से सींचें । (Farmers should water their fields.)

(घ) हम देश को ऊँचा उठाएँ । (We should uplift our country.)

(ङ) तुम दोनों घर न जाओ । (Both of you do not go home.) □□

*Teaching Point :*
(i) 'द्वि' declension

पञ्चमः पाठः

# क्रीडायाः क्षेत्रम्

विविध दलम् क्रीडकः उत्साहः निर्णायक खेलय् रत पर स्पृश् स्व चरण कन्दुकम् शब्दिका नियमः समान



क्रीडायाः क्षेत्रम् पश्यत । विद्यालयस्य छात्राः अत्र खेलन्ति । तत्र विविधाः क्रीडाः भवन्ति । प्रथमे क्षेत्रे कबड्डी भवति । एतस्याम् क्रीडायाम् द्वे दले भवतः । एकस्मिन् दले सप्त क्रीडकाः भवन्ति । द्वयोः दलयोः एव क्रीडकाः उत्साहेन खेलन्ति । एकः निर्णायकः अपि भवति । सः द्वे दले खेलयति ।

द्वितीये क्षेत्रे छात्राः "खो-खो"–क्रीडायाम् रताः सन्ति । एतस्याम् क्रीडायाम् प्रत्येकम् दले नव क्रीडकाः भवन्ति । एकस्य दलस्य क्रीडकाः परान् स्प्रष्टुम् प्रयत्नम् कुर्वन्ति, द्वितीयस्य दलस्य च क्रीडकाः स्वान् रक्षन्ति ।

तृतीये क्षेत्रे बालाः चरणकन्दुकेन क्रीडन्ति । अत्र अपि एकः निर्णायकः अस्ति । तस्य हस्ते शब्दिका भवति ।



काले काले एतासु क्रीडासु प्रतियोगिताः भवन्ति । प्रतियोगिताम् द्रष्टुम् द्वयोः एव विद्यालययोः छात्राः आगच्छन्ति, स्वस्य दलस्य च उत्साहम् वर्धयन्ति ।

क्रीडासु द्वाभ्याम् एव दलाभ्याम् नियमाः समानाः भवन्ति ।

## -शब्दार्थाः

| | | | |
|---|---|---|---|
| क्रीडा | = | खेल | (game) |
| विविध | = | अनेक प्रकार की | (various) |
| दलम् | = | टीम | (team) |
| क्रीडकः | = | खिलाड़ी | (player) |
| उत्साहः | = | हिम्मत | (encouragement) |
| निर्णायकः | = | रैफ़्री, फ़ैसला करने वाला | (referee) |
| खेलय् | = | खेल खिलाना | (to make play) |
| रत | = | लीन | (busy) |
| पर | = | दूसरा | (other) |
| स्पृश् | = | छूना | (to touch) |
| स्व | = | अपना | (one's own) |
| चरण-कन्दुकम् | = | फ़ुट-बॉल | (foot-ball) |

| | | |
|---|---|---|
| शब्दिका | = सीटी | (whistle) |
| नियमः | = नियम | (rule) |
| समान | = एक जैसा | (same) |

**धातुः**

खेलय् (1)  स्पृश् (2)

**रूपम्** द्वि (पृष्ठ 98)

**विशेषणानि**

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| विविधः | विविधा | विविधम् |
| रतः | रता | रतम् |
| परः | परा | परम् |
| स्वः | स्वा | स्वम् |
| समानः | समाना | समानम् |

## अभ्यासः

**मौखिकम्**

1. शुद्ध उच्चारण के साथ यह पाठ पढ़िये (Read this lesson with correct pronunciation).
2. अर्थ बताइये (Give meanings)—
   विविध, शब्दिका, मुहुर्मुहुः, तथाहि, वितस्ता ।

**लिखितम्**

3. 'द्वि' शब्द के यथापृष्ट रूप लिखिये (Give forms of द्वि as asked)—

| | पुं० | स्त्री० | नपुं० |
|---|---|---|---|
| तृतीया विभक्तिः | .................. | .................. | .................. |
| चतुर्थी ,, | .................. | .................. | .................. |
| पञ्चमी ,, | .................. | .................. | .................. |
| षष्ठी ,, | .................. | .................. | .................. |
| सप्तमी ,, | .................. | .................. | .................. |

4. संस्कृत वाक्यों में प्रयुक्त कीजिए (Use in Sanskrit sentences)—
क्रीड्, क्रीडा, क्रीडकः, क्रीडा-क्षेत्रम् ।
5. अन्तर स्पष्ट कीजिए (Make the difference clear)—
पठ्, पाठय्; खेल्, खेलय्; चल्, चालय्; नश्, नाशय् ।
6. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
(क) आश्रम में अनेक प्रकार के वृक्ष हैं । (In the hermitage, there are many kinds of trees.)
(ख) सैनिको, उत्साह से युद्ध करो । (Soldiers, fight with courage.)
(ग) दो कन्याएँ बाग़ को जा रही है । (Two girls are going to the garden.)
(घ) पैरों में दो जूते हैं । (There are two shoes in the feet.)
(ङ) माँ उन दो बच्चों को चूम ले । (Mother should kiss those two children.) □□



*Teaching Point :*

(i) 'त्रि' declension

## षष्ठः पाठः

## त्रयः मत्स्याः

**जलाशय कदाचित् धीवरः बहु तर्हि आजीविका वार्ता श्रुतिपथम् आ+गम् त्यज् द्राक् युक्त भयम् अनागतम् विचारः उप+हस् भाग्यम् अनुकूल प्रतिकूल परिवारः प्र+नश् पराहः काठिन्यम् भाग्यपर**



एकस्मिन् जलाशये त्रयः मत्स्याः वसन्ति स्म । कदाचित् तम् जलाशयम् दृष्ट्वा धीवराः अवदन् "बहून् मत्स्यान् अत्र पश्यामः । तर्हि श्वः अत्र एव आगमिष्यामः, एतान् मत्स्यान् च जालेन बद्धान् कृत्वा आजीविकाम् अर्जिष्यामः" इति ।

एषा वार्ता त्रयाणाम् एव मत्स्यानाम् श्रुतिपथम् आगच्छत् । एतत् आकर्ण्य तेषु त्रिषु प्रथमः मत्स्यः अवदत्–"आकर्णयथ न वा यत् एते धीवराः कथयन्ति । एतम् जलाशयम् त्यक्त्वा वयम् द्राक् एव अन्यत्र गच्छेम ।" तदा द्वितीयः मत्स्यः अवदत्–"न एतत् युक्तम् । भयेन कार्यं न भवति । अनागतस्य विचारः न युक्तः । यदि ते आगमिष्यन्ति तदा वयम् द्राक् एव एतत् स्थानम् त्यक्ष्यामः ।" तृतीयः द्वौ एव उपाहसत् अकथयत् च "युवाम् द्वौ एव मूर्खौ । यदि भाग्यम् अनुकूलम् अस्ति तदा अत्र एव रक्षा भविष्यति । यदि भाग्यम् एव प्रतिकूलम् तदा अन्यत्र अपि नंक्ष्यामः ।"



एवम् चिन्तयित्वा प्रथमः तु स्वेन परिवारेण सह अन्यत्र प्राणश्यत् । ततः पराहे धीवराः तत्र आगच्छन् । तान् दृष्ट्वा द्वितीयः अपि काठिन्येन स्वान् प्राणान् अरक्षत् । भाग्यपरः च तृतीयः धीवराणाम् जालेन बद्धः अभवत् ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| जलाशयः | = | तालाब | (pond) |
| कदाचित् | = | कभी | (sometime) |
| धीवरः | = | मछियारा | (fisherman) |
| बहु | = | बहुत | (many, much) |
| तर्हि | = | तो | (then) |
| आजीविका | = | रोज़ी | (livelihood) |
| वार्त्ता | = | बात | (talk) |
| श्रुतिपथम् आ+गम् | = | सुनना | (to hear) |
| त्यज् | = | छोड़ना | (to leave) |
| द्राक् | = | जल्दी | (immediately) |
| युक्त | = | उचित | (proper) |
| भयम् | = | डर | (fear) |

| | | |
|---|---|---|
| अनागतम् | = भविष्य, न आया हुआ | (future, yet to come) |
| विचारः | = विचार | (thought) |
| उप+हस् | = मज़ाक करना | (to laugh at) |
| भाग्यम् | = भाग्य | (fate) |
| अनुकूल | = सीधा | (favourable) |
| प्रतिकूल | = विपरीत | (opposite) |
| परिवारः | = परिवार | (family) |
| प्र+नश् | = भाग जाना | (to run away) |
| पराहः | = दूसरा दिन | (next day) |
| काठिन्यम् | = कठिनाई | (difficulty) |
| भाग्यपर | = भाग्य पर विश्वास करने वाला | (fatalist) |

धातुः त्यज् (2)

उपसर्गयुक्त-धातुः

उप+हस्, प्र+नश् (प्रणश्)

रूपम् त्रि (पृष्ठ 98)

विशेषणानि

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| बहुः | बहुः | बहु |
| युक्तः | युक्ता | युक्तम् |
| अनुकूलः | अनुकूला | अनुकूलम् |
| प्रतिकूलः | प्रतिकूला | प्रतिकूलम् |
| –परः | –परा | –परम् |

अव्यय : कदाचित्, तर्हि, द्राक्

मुहावरा (Idiom) - श्रुतिपथम् आ+गम्

## अभ्यासः

### मौखिकम्

1. शब्द, लिंग और वचन बताइए (Give for each of the following the basic word, its gender and its number.)—
   द्वे, एका, तिस्रः, त्रीणि, द्वयोः, त्रयः ।

2. नीचे कुछ उपसर्ग और धातु दिये गये हैं। उनसे सार्थक उपसर्गयुक्त धातुओं का निर्माण कीजिए (Given below are some prefixes and roots. Join them to generate prefixed roots.)—

उपसर्ग–अधि, अनु, आ, उत्, उप, प्रति, प्र, वि, सम्, अव् निर्।

धातु–गम्, भू, नी, हस, ह, विश, वद्, स्थ्, कर्ण्य्, चर्, नश्, सद्।

## लिखितम्

3. त्रि के पुंल्लिग, स्त्रीलिंग और नपुंसकलिंग में रूप लिखिए (Decline त्रि in all three genders.)

केवल भाग्य पर विश्वास करने से क्या हानि है ? (What's the harm in relying on fate alone?)

4. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
   (क) जलाशयम् दृष्ट्वा धीवराः किम् अवदन् ?
   (ख) प्रथमः मत्स्यः किम् अकथयत् ?
   (ग) द्वितीयः मत्स्यः किम् अकथयत् ?
   (घ) तृतीयः मत्स्यः किम् अकथयत् ?

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
   (क) बच्चो, आपस में खेलो। (Children, play together.)
   (ख) एक, दो, तीन–इस प्रकार गिनो। (One, two, three—count like this.)
   (ग) इन तीनों का उपहास मत करो। (Do not make fun of these three.)
   (घ) तीन दिनों के लिए वहाँ कौन जाएगा ? (Who will go there for three days ?)
   (ङ) तीन लड़कियों ने यह बात सुनी। (Three girls heard this thing.) □□



*Teaching Point :*

(i) 'चतुर्' declension

# सप्तमः पाठः — श्रीरामः

ज्येष्ठ राजकुमारः मिथः प्रगाढ़ भृशम् राज्ञी जननी ऋषिः राक्षसः यज्ञः इष्(इच्छ्)
विवाह स्वागतम् राज्यम् प्रज्ञा



पुरा अयोध्यायाम् दशरथः नृपः आसीत् । तस्य चत्वारः पुत्राः आसन्—रामः लक्ष्मणः भरतः शत्रुघ्नः च । तेषु चतुर्षु रामः ज्येष्ठः आसीत् । चतुर्णामेव राजकुमाराणाम् मिथः प्रगाढ़ः स्नेहः आसीत् । चतुरः एव पुत्रान् दृष्ट्वा दशरथः भृशम् प्रसीदति स्म । दशरथस्य तिस्रः राज्यः आसन् । तासु कौसल्या रामस्य जननी आसीत् ।

एकदा ऋषिः विश्वामित्रः आगत्य दशरथम् अवदत्—"वने राक्षसाः मम यज्ञम् नाशयन्ति । यज्ञस्य रक्षायै रामम् लक्ष्मणम् च इच्छामि ।" दशरथस्य आज्ञया ऋषिः तौ अनयत् । तौ तत्र राक्षसान् नाशयित्वा यज्ञम् अरक्षतम् ।



रामस्य विवाहः सीतया सह अभवत् । दशरथस्य आज्ञया सः वनम् अगच्छत् । सीता लक्ष्मणः च अपि तेन सह अगच्छताम् । तत्र रावणः सीताम् अहरत् । सुग्रीवस्य सहायतया रामः रावणम् अनाशयत् । ततः सः अयोध्याम् आगच्छत् । भरतः रामस्य स्वागतम् अकरोत् तस्मै च राज्यम् अयच्छत् । रामम् नृपम् दृष्ट्वा प्रजा प्रसन्ना अभवत् ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| ज्येष्ठ | = | सबसे बड़ा | (eldest) |
| राजकुमारः | = | राजा का बेटा | (prince) |
| मिथः | = | आपस में | (with one another) |
| प्रगाढ | = | गहरा, बहुत | (thick, a lot of) |
| भृशम् | = | अत्यधिक | (very much) |
| राज्ञी | = | रानी | (queen) |
| जननी | = | माता | (mother) |

| | | | |
|---|---|---|---|
| ऋषिः | = | ऋषि | (sage) |
| राक्षसः | = | राक्षस | (demon) |
| यज्ञः | = | यज्ञ | (fire-worship) |
| इष् (इच्छ्) | = | इच्छा करना | (to want) |
| विवाहः | = | विवाह | (marriage) |
| स्वागतम् | = | स्वागत | (welcome) |
| राज्यम् | = | राज्य | (kingdom) |
| प्रजा | = | प्रजा | (subject, people) |

धातु : इष् (इच्छ्) (2)

रूपाणि

चतुर् (पृष्ठ 98), राज्ञी, जननी, 'नदी' के समान (like नदी) (पृष्ठ 94)

विशेषणानि

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| ज्येष्ठः | ज्येष्ठा | ज्येष्ठम् |
| प्रगाढः | प्रगाढा | प्रगाढम् |

अव्ययः मिथः

## अभ्यासः

### मौखिकम्

1. राम आदर्श पुरुष क्यों कहलाते हैं? (Why is Rama called the ideal man?)
2. अर्थ बताइए (Give meaning)—
   भृशम्, भ्रमरः, भष्, तरुः, कृत्, रत ।

### लिखितम्

3. उत्तर संस्कृत में दीजिए (Answer in Sanskrit)—
   (क) विश्वामित्रः दशरथाय किम् अकथयत्?
   (ख) रामः लक्ष्मणः च यज्ञम् कथम् अरक्षताम्?
   (ग) भरतः रामाय किम् अयच्छत्?
   (घ) दशरथस्य कति पुत्राः आसन्?

4. 'चतुर्' शब्द के रूपों से रिक्त स्थानों की पूर्ति कीजिए (Fill in the blanks with forms of चतुर्)—

| | | |
|---|---|---|
| ............ देवाः, | ............ कन्याभ्यः, | ............ वायुयानानि |
| ............ युक्तिभिः, | ............ निबन्धानाम्, | ............ फलेभ्यः |
| ............ बालकान्, | ............ दिनेषु, | ............ बालिकाभ्यः |

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
   (क) मैं गुरुओं का स्वागत करता हूँ । (I welcome teachers.)
   (ख) चार दोस्त आपस में खेल रहे हैं । (Four friends are playing with each other.)
   (ग) उन चारों में मेरा छोटा भाई नहीं है । (My younger brother is not among those four.)
   (घ) हम स्वस्थ बालक बनें । (We should become healthy children.)
   (ङ) सबसे बड़े भाई का हम चारों पर गहरा प्रेम है । (The eldest brother has great affection for all four of us.)

□□



*Teaching Point :*

(i) 'किम्, यत्, अन्य–declension

अष्टमः पाठः

# जन्तुशाला

जन्तुशाला अलम् विस्तरः प्रवेश-पत्रम् तातः विशालकायः गण्डकः प्रथमम् विविध-वर्ण चटकः स्वर्ण-वर्ण अतीव बलयुक्त महापंजरकः जन्तुराजः व्यवस्था रक्षणम् श्रान्त



अनुजः– अस्माकम् जनकः अस्मान् अत्र किमर्थम् आनयत्?

अग्रजः– किम् न अवगच्छसि? जन्तुशाला एषा ।

अनुजः– अत्र के जन्तवः सन्ति?

अग्रजः– अलम् विस्तरेण, स्वयमेव द्रक्ष्यसि । आगच्छ ।

(जनकः प्रवेश-पत्राणि अधिगत्य बालैः सह गच्छति)

अनुजः– तात, कः एषः विशालकायः?

राधा– गण्डकः एषः । प्रथमम् एतान् विविध-वर्णान् चटकान् तु पश्य ।



अनुजः– पश्यामि । पश्य, पश्य, तत्र जलाशये हंसाः तरन्ति । रे ! सः हंसः तु स्वर्ण-वर्णः ! सुन्दरः सः ।

जनकः– बालाः, क्रमेण एकम् एकम् जन्तुम् पश्यत । एषः गण्डकः अतीव बलयुक्तः ! जलस्य समीपे एव सदा तिष्ठति ।

अनुजः– तात, अहम् चिन्तयामि यत् तम् मारयितुम् न कः अपि समर्थः अस्ति?

अग्रजः– कथं न? तत्र महापंजरके सिंहम् पश्य । सः तु जन्तुराजः अस्ति । गण्डकः वा स्यात् गजः वा स्यात् । सिंहः क्षणेन एव तम् नाशयितुम् समर्थः अस्ति ।

राधाः– तात, ये जन्तवः अत्र वसन्ति, तेषाम् भोजनस्य व्यवस्था कस्य कार्यमस्ति?

जनकः– तत्र प्रत्येकम् जन्तवे सेवकः भवति । सः एव जन्तोः भोजनस्य रक्षणस्य च कार्यम् करोति ।

अनुजः– तात, वयम् तु श्रान्ताः स्मः । उपविशाम । भोजनम् कृत्वा अन्यान् जन्तून् द्रक्ष्यामः ।

(ते भोजनाय उपविशन्ति)

## शब्दार्थाः

| | | | |
|---|---|---|---|
| जन्तुशाला | = | चिड़ियाघर | (zoo) |
| अलम् | = | बस, कोई आवश्यकता नहीं | (needless, enough) |
| विस्तरः | = | विस्तार | (explanation) |

| | | | |
|---|---|---|---|
| प्रवेश-पत्रम् | = | टिकट | (entry ticket) |
| तातः | = | पिता | (father) |
| कः (किम्) | = | कौन | (who) |
| विशालकायः | = | विशाल शरीर वाला | (one with a big body) |
| गण्डकः | = | गैंडा | (rhinoceros) |
| प्रथमम् | = | पहले | (firstly-*adverb*) |
| विवध-वर्ण | = | अनेक रंगों वाला | (multi-coloured) |
| चटकः | = | चिड़िया | (sparrow) |
| स्वर्ण-वर्ण | = | सोने के रंग वाला | (golden) |
| अतीव | = | बहुत | (very) |
| बलयुक्त | = | बलवान | (strong) |
| कः अपि | = | कोई भी | (anybody) |
| महापंजरकः | = | बड़ा पिंजरा | (big cage) |
| जन्तुराजः | = | पशुओं का राजा | (king of animals) |
| क्षणः | = | क्षण | (moment) |
| यत् | = | जो | (whosoever) |
| व्यवस्था | = | प्रबन्ध | (arrangement) |
| रक्षणम् | = | रक्षा | (protection) |
| श्रान्त | = | थका हुआ | (tired) |
| अन्य | = | दूसरा | (other) |

**रूपाणि** किम्, यत्, अन्य (पृष्ठ 96-97)

**विशेषणानि**

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| –कायः | –काया | –कायम् |
| –वर्णः | –वर्णा | –वर्णम् |
| –युक्तः | –युक्ता | –युक्तम् |
| श्रान्तः | श्रान्ता | श्रान्तम् |

**अव्ययाः** अलम्, प्रथमम्, अतीव

**उपपद-विभक्तिः**

'अलम्' जब 'नहीं' या 'बस' के अर्थ में हो तो सम्बन्धित शब्द में क्त्वा या तुमुन् या तृतीया विभक्ति आती है ।

If अलम् is being used in the sense of 'no' or 'that's all', then the accompanying word gets क्त्वा, तुमुन् or the तृतीया विभक्ति ।

## अभ्यासः

### मौखिकम्

1. स्त्रीलिग रूप बताइए (Give the feminine forms)—
   सकलः, प्रसिद्धः, सुन्दरः स्वर्णिमः, श्रान्तः ।
2. किम्, यत् और अन्य के रूप तीनों लिगों में सुनाइए (Decline किम्, यत् and अन्य in all the three genders).

### लिखितम्

3. यथापृष्ट पुँल्लिग रूप लिखिए (Give the masculine forms as asked)—

| | | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|---|
| किम् | प्रथमा विभक्ति | ............ | ............ | ............ |
| यत् | तृतीया विभक्ति | ............ | ............ | ............ |
| अन्य | पंचमी विभक्ति | ............ | ............ | ............ |
| अन्य | सप्तमी विभक्ति | ............ | ............ | ............ |

4. पाठ में वर्णित पशुओं के अतिरिक्त ऐसे पाँच पशुओं के संस्कृत-नाम बताइए जो चिड़ियाघर में मिलते हों ।
   (Name five zoo animals other than the ones mentioned in the lesson).
5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
   (क) सहायता की कोई आवश्यकता नहीं । (There is no need of help.)
   (ख) बलयुक्त लोग ही देश की रक्षा करते हैं । (Powerful people alone can protect the country.)
   (ग) देखो, पिंजरे में कौन है? (Look, who is there in the cage?)
   (घ) जो थका हुआ है वह छोटा भाई है । (The one who is tired is the younger brother.)
   (ङ) दूसरों को भी खाने की चीज़ें दो । (Give eating stuff to others too.) □□

*Teaching Point :*
(i) चित् suffix

नवमः पाठः

# नलः दमयन्ती च

आखेटः लुब्ध सविनयम् हितम् पुनः राजकुमारी परः गुणः कीर्तय् प्रासादः मुग्ध रूपम् प्रसृत परि+नी रुचिः स्वयंवरः छाया बुद्धिसरणिम्अव+तृ रहित तदनु सहित पुष्प-माला



कश्चित् नृपः आसीत् । तस्य अभिधानम् नलः आसीत् । एकदा सः आखेटाय वनमगच्छत् । तत्र सः कंचित् हंसम् अपश्यत् । हंसः स्वर्ण-वर्णः आसीत् । नृपस्य लुब्धाम् दृष्टिम् दृष्ट्वा हंसः तस्मै सविनयम् अकथयत्– "भोः नृप, माम् मा मारय । अहम् तव किञ्चित् हितम् करिष्यामि ।"

नृपः अवदत्– "रे, त्वम् किम् हितम् करिष्यसि ?" हंसः पुनः अवदत्– "विदर्भस्य राजकुमारी दमयन्ती अतीव सुन्दरी । तस्याः पुरः अहम् तव गुणान् कीर्तयिष्यामि ।"

एवम् कथयित्वा सः विदर्भ-देशम् अगच्छत् । तस्मिन् काले दमयन्ती प्रासादे

विहरति स्म । स्वर्ण-वर्णं हंसम् समीपे दृष्ट्वा सा प्रसन्ना अभवत् । तदा हंसः नलस्य गुणान् अकीर्तयत् । दमयन्ती नले मुग्धा अभवत् ।



दमयन्त्याः रूपस्य कीर्तिः सर्वत्र प्रसृता आसीत् । केचित् देवाः अपि ताम् परिणेतुम् अवाञ्छन् । परम् नले तस्याः रुचिम् दृष्ट्वा ते असीदन् । यदा स्वयंवरः अभवत् तदा देवाः अपि नलस्य रूपम् धारयित्वा तत्र आगच्छन् । स्वयंवरे अनेकान् नलान् दृष्ट्वा दमयन्ती विस्मिता अभवत् । तदा काचित् युक्तिः तस्याः बुद्धिसरणिम् अवातरत् यत् देवाः तु छायया रहिताः भवन्ति । तदनु सा छायया सहितम् नलम् पुष्प-मालया आर्चत् ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| आखेटः | = | शिकार | (hunting) |
| लुब्ध | = | लालच-भरा | (greedy) |
| सविनयम् | = | नम्रतापूर्वक | (humbly) |
| हितम् | = | भलाई | (welfare) |
| पुनः | = | फिर | (again) |
| राजकुमारी | = | राजा की बेटी | (princess) |
| पुरः | = | सामने | (in front of) |
| गुणः | = | गुण | (virtue) |
| कीर्तय् | = | वर्णन करना | (narrate) |
| प्रासादः | = | महल | (palace) |

| | | | |
|---|---|---|---|
| मुग्ध | = | मोहित | (fascinated) |
| रूपम् | = | सुन्दरता | (beauty) |
| प्रसृत | = | फैली हुई | (spread) |
| परि+नी (नय्) | = | विवाह करना | (to marry) |
| रुचिः | = | रुचि | (interest) |
| स्वयंवरः | = | स्वयंवर | (bridegroom-choosing-ceremony) |
| विस्मित | = | चकित | (surprised) |
| बुद्धिसरणिम् अव+तृ | = | समझ आना | (to understand) |
| छाया | = | छाया | (shadow) |
| रहित | = | रहित | (without) |
| तदनु | = | उसके बाद | (after that) |
| सहित | = | सहित | (with) |
| पुष्प-माला | = | फूलों का हार | (garland) |

धातुः कीर्त्य (1)

उपसर्ग-युक्त-धातुः परि+नी (नय्) = परिणय्

### विशेषणानि

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| लुब्धः | लुब्धा | लुब्धम् |
| मुग्धः | मुग्धा | मुग्धम् |
| प्रसृतः | प्रसृता | प्रसृतम् |
| विस्मितः | विस्मिता | विस्मितम् |
| रहितः | रहिता | रहितम् |
| सहितः | सहिता | सहितम् |

### अव्ययाः

पुनः, पुरः, सविनयम्, (तद्) अनु

### उपपद-विभक्तिः

'रहित', 'सहित'—इन दोनों शब्दों से पूर्व आए शब्द में तृतीया विभक्ति लगती है। (The word that comes before 'रहित' and 'सहित' takes the तृतीया विभक्ति).

मुहावरा (Idiom)—बुद्धिसरणिम् अव+तृ

## अभ्यासः

### मौखिकम्

1. नल और दमयन्ती की कथा अपने शब्दों में सुनाइए । (Tell the story of Nala and Damayanti in your own words).
2. परि+नी के रूप लट् और लृट् में बोलिए । (Conjugate परि+नी in लट् and लृट्).

### लिखितम्

3. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
   (क) हंसः नृपाय किम् अकथयत् ?
   (ख) हंसः नलाय किम् अकरोत् ?
   (ग) बहून् नलान् दृष्ट्वा दमयन्ती किम् अचिन्तयत् ?
   (घ) दमयन्ती देवान् कथम् न वाञ्छति स्म ?
4. प्रत्येक शब्द से संस्कृत वाक्य बनाइए (Make a Sanskrit sentence with each of the following)—
   कश्चित्, काचित्, कञ्चित्, कस्मैचित, कस्यांचित् ।
5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
   (क) किसी वन में एक शेर था । (In some forest, there lived a lion.)
   (ख) यह छाया किसी बालक की है । (This shadow is some boy's.)
   (ग) उसके बाद कुछ फल लाओ । (Bring some fruit after it.)
   (घ) किसी बुद्धिमान् के साथ ठहरो । (Stay with some intelligent person.)
   (ङ) कोई दो मुनि आए । (Some two sages came.)



*Teaching Point :*

(i) अनुस्वार-संधि :

दशमः पाठः

# गर्दभस्य गीतम्

गर्दभः रजकः वह् रात्रि अन्नम् कर्कटिका राज् स्वरः ताडय्
धिक् तावत् द्वारम् तथा यथा आतृप्ति मृतप्राय



कस्मिंश्चित् ग्रामे एकः गर्दभः आसीत् । दिने सः रजकस्य वस्त्राणि वहति स्म । रात्रौ च सः इतस्ततः भ्रमति स्म । कश्चित् शृगालः तस्य मित्रमभवत् । रात्रौ तौ भ्रमित्वा स्वं कालं नयतः स्म । रात्रौ क्षेत्राणि प्रविश्य तौ अन्नं खादतः स्मः ।

एकदा तौ कर्कटिकानां क्षेत्रम् अगच्छताम् । तत्र काश्चित् कर्कटिकाः खादित्वा गर्दभः अवदत्–"भोः मित्र, समयः सुन्दरः । आकाशे चन्द्रः राजति । अहम् एकं गीतं गास्यामि । कथय, केन स्वरेण गायानि ?" इति । शृगालः अवदत्–"एवं मा कुरु । तव स्वरम् आकर्ण्य कृषकः अत्र आगमिष्यति आवां च ताडयिष्यति" इति ।



गर्दभः अवदत्–"धिक् त्वां, यत् एवं चिन्तयसि" इति। तदा किञ्चित् चिन्तयित्वा शृगालः अवदत्–"तिष्ठ तावत्, द्वारे स्थित्वा अहं कृषकं पश्यामि। तदा त्वम् आतृप्ति गाय।"

एवं कथयित्वा शृगालः बहिः अगच्छत् गर्दभः च आतृप्ति अगायत्। गर्दभस्य स्वरम् आकर्ण्य कृषकः तत्र आगच्छत् गर्दभम् च लगुडेन भृशम् तथा अताडयत् यथा गर्दभः मृतप्रायः अभवत्।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| गर्दभः | = | गधा | (donkey) |
| रजकः | = | धोबी | (washerman) |
| वह् | = | ढोना | (to carry) |
| रात्रिः | = | रात | (night) |
| अन्नम् | = | अन्न | (grain) |
| कर्कटिका | = | ककड़ी | (cucumber) |
| राज् | = | चमकना | (to shine) |
| स्वरः | = | संगीत का स्वर, आवाज़ | (note, sound) |
| ताडय् | = | पीटना | (to beat) |
| धिक् | = | धिक्कार | (curse) |
| तावत् | = | तो | (then) |
| द्वारम् | = | दरवाज़ा | (door) |
| आतृप्ति | = | जी भर कर | (to one's satisfaction) |
| तथा | = | उतना, वैसा | (so much) |
| यथा | = | जिससे, जैसा | (that, as) |
| मृतप्राय | = | मरे जैसा | (almost dead) |

**धातवः**

वह् (2), राज् (1), ताडय् (2)

**विशेषणम्**

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| मृतप्रायः | मृतप्राया | मृतप्रायम् |

**अव्ययाः**

धिक्, तावत्, तथा, यथा, आतृप्ति ।

**उपपद-विभक्तिः**

'धिक्' के योग में आए शब्द में **द्वितीया** विभक्ति होती है (The word coming with धिक् takes द्वितीया विभक्ति).

## अभ्यासः

**मौखिकम्**

1. इस कहानी से क्या शिक्षा मिलती है? (What is the moral of this story?)

**लिखितम्**

2. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
   (क) गर्दभः श्रृगालः च कुत्र अगच्छताम् ?
   (ख) गर्दभः श्रृगालम् किम् अवदत् ?
   (ग) गर्दभं क्षेत्रे दृष्ट्वा कृषकः किम् अकरोत् ?
3. सन्धि कीजिए (Join the words according to Sandhi rules)—
   लगुडम् पश्य, द्वारम् गच्छ, अन्नम् खाद, वस्त्रम् धारय्, एवम् कृत्वा, गर्दभम् च ।
4. सर्वनाम से 'चित्' प्रत्यय अलग कीजिए (Separate चित् from pronouns)—
   कस्मिश्चित, काश्चित्, कश्चित्, किञ्चित् ।
5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
   (क) मूर्ख को धिक्कार है । (Curse on the fool!)
   (ख) बुद्धि-सहित मनुष्य ही सम्मान पाता है । (Only an intelligent person gets respect.)
   (ग) अन्न की आवश्यकता नहीं है । (There is no need of grains.)
   (घ) धन से रहित मज़दूर दुःखी होता है । (A labourer without money gets distressed.)
   (ङ) सदा मीठा बोलो । (Always speak sweet.)

□□

*Teaching Point :*

(i) दीर्घ सन्धि :

(ii) सप्त–declension

## एकादशः पाठः

## बुद्धः

मासः पूर्णिमा अनन्तरम् परलोकः विमाता पुष्ट संसारः इति हेतु साधूदयः खिन्न एवंविध रागः विरक्त अश्वत्थः वर्षम् तपस्या विचारशुद्धिः कर्मशुद्धिः उपदेशः सारः

पुरा नेपाल-देशे 'शाक्य'-जातेः नृपः शुद्धोदनः आसीत् । वैशाख-मासस्य पूर्णिमायाम् तस्य एकः पुत्रः अभवत् । सप्तभ्यः दिनेभ्यः अनन्तरम् तस्य जननी परलोकमगछत् । तदा तस्य विमाता गौतमी तमपालयत् ।राजकुमारस्याभिधानं गौतमः आसीत् । परिवारस्य जनाः तं स्नेहेन सिद्धार्थम् अपि कथयन्ति स्म ।



एकदा असितः नाम कश्चित् वृद्धः ऋषिः तत्रागच्छत् । सः बालकं दृष्ट्वा प्रथमम् अहसत् ततः च खिन्नः अभवत् । नृपेण पृष्टः स अवदत्-"एषःबालकः संसारं त्यक्त्वा वनं गमिष्यतीति हेतोः अहसम् । नाह वृद्धः साधूदयम् द्रक्ष्यामीति हेतोः खिन्नः अस्मि ।"



एतत् आकर्ण्य शुद्धोदनः एवंविधान् उपायान् अकरोत् यैः गौतमस्य संसारे रागः भवेत् । सः तस्य विवाहमपि अकरोत् । परम् एकस्मिन् दिने सः एक वृद्धम्, एकं

रुग्णम्, एकं शवं चापश्यत् । किमहमपि एवं भविष्यामीति चिन्तयित्वा सः संसारात् विरक्तः अभवत् ।

सः संसारमत्यजत् वनं चागच्छत्। 'गया' नाम स्थाने अश्वत्थस्य नीचैः द्वादश वर्षाणि तपस्याम् आचरत् ज्ञानं चाविन्दत् । तस्मात् कालात् तस्याभिधानं 'बुद्धः' अभवत् ।

अहिंसा, विचारशुद्धिः कर्मशुद्धिः च तस्य उपदेशानां सारः अस्ति ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| मासः | = | महीना | (month) |
| पूर्णिमा | = | पूर्णिमा | (full moon night) |
| अनन्तरम् | = | बाद | (after) |
| परलोकः | = | परलोक | (the next world) |
| विमाता | = | सौतेली माँ | (step mother) |
| पृष्ट | = | पूछा हुआ | (asked) |
| संसारः | = | संसार | (world) |
| इति | = | इस (कारण) से | (due to this reason) |
| हेतुः | = | कारण | (reason) |
| साधूदयः | = | सज्जन की उन्नति | (rise of the holy man) |
| खिन्न | = | दुःखी | (sad) |
| एवंविध | = | इस प्रकार का | (of this kind) |
| रागः | = | प्रेम | (attachment) |
| शवः | = | मृत शरीर | (dead body) |
| विरक्त | = | वैराग्य, प्रेम-हीन | (detached) |
| अश्वत्थः | = | पीपल का पेड़ | (peepal tree) |
| वर्षम् | = | साल | (year) |
| तपस्या | = | तपस्या | (penance) |
| विचारशुद्धिः | = | विचारों में पवित्रता | (purity in thought) |
| कर्मशुद्धिः | = | कामों में पवित्रता | (purity in action) |
| उपदेशः | = | उपदेश | (teaching) |
| सारः | = | निचोड़ | (substance) |

रूपम्

हेतु–साधु के समान, पृष्ठ 94

विशेषणानि

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| पृष्टः | पृष्टा | पृष्टम् |
| खिन्नः | खिन्ना | खिन्नम् |
| एवंविधः | एवंविधा | एवंविधम् |
| विरक्तः | विरक्ता | विरक्तम् |

अव्ययाः अनन्तरम्, इति

उपपद-विभक्तिः

(क) 'अनन्तरम्' के योग में आए शब्द में पञ्चमी विभक्ति (The word that comes with अनन्तरम् takes पञ्चमी विभक्ति).

(ख) कारण बताने के लिए 'हेतु' शब्द में पञ्चमी विभक्ति (For expressing reason,हेतु takes पञ्चमी विभक्ति).

(ग) अवधि बताने के लिए समय-वाचक शब्द में द्वितीया विभक्ति (For expressing duration, time words take द्वितीया विभक्ति).

विशेषः 'इति' के दो अर्थ। देखिए पाठ दो तथा पाठ ग्यारह (इति has two meanings. See Lesson No. 2 and 11).

## अभ्यासः

मौखिकम्

1. सन्धि-विच्छेद कीजिए (Disjoin the following)—
   राजकुमारस्याभिधानम्, तं स्नेहेन, तत्रागच्छत्, साधूदयः, गमिष्यतीति, द्रक्ष्यामीति, चापश्यत्, वनं चागच्छत्।
2. भगवान बुद्ध के जीवन के बारे में कुछ बताइए। (Say a few sentences about the life of Lord Buddha).

## लिखितम्

3. सन्धि कीजिए (Join the following)—
गुरु+उपदेशः, साधु+उक्तिः, प्रभु+उपवनम्, नदी+इरावती, गच्छति+इति, इति+इतस्ततः, अहिंसा+अस्ति, अद्य+अनुजः, राग+अरिः ।

4. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
   (क) गौतमस्य जनकस्याभिधानं किमासीत् ?
   (ख) गौतमं दृष्ट्वा असितः किमकरोत् ?
   (ग) गौतमः संसारात् विरक्तः कथमभवत् ?
   (घ) बुद्धस्य उपदेशानां सारः कः अस्ति ?

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
   (क) मनुष्य के लिए विचारशुद्धि आवश्यक है । (Purity of thought is necessary for a human being.)
   (ख) इस प्रकार के काम मत करो । (Do not do deeds of this kind.)
   (ग) सात महीने के बाद क्या होगा ? (What will happen after seven months ?)
   (घ) मैं सात दिन काश्मीर में रहा । (I stayed in Kashmir for seven days.)
   (ङ) स्वास्थ्य के कारण मैं वहाँ गया ।(I went there for health reasons.) □□



*Teaching Point :*

(i) गुण संधि:

| द्वादशः पाठः |
|---|

# मूषकः महर्षिः च

महर्षिः उप+गम् (गच्छ्) भीत निश्शंक इत्थम् निश्श्वसित सम्मुखम् प्रार्थना मृगेन्द्रः क्रमेण महोन्मत्त कदाचित् पूर्वम् ईदृश शप्



कश्चित् मूषकः आसीत् । सः विडालात् त्रस्यति स्म । सः महर्षिम् उपागच्छत् अकथयत् च—एषः विडालः मां खादितुम् उद्यतः । मां रक्षेति । महर्षिः अवदत्—त्वमपि विडालः भवेति । ततः सः अपि विडालः अभवत् ।

तदा कुक्कुरं दृष्ट्वा सः अत्रस्यत् । पुनः महर्षिम् उपगत्य सः अवदत्—"महर्षे, कुक्कुरात् भीतः अस्मि इति ।" महर्षिः पुनः अकथयत्—"त्वमपि कुक्कुरः भव ।" तदा सः विडालः कुक्कुरः अभवत् ।

कानिचित् दिनानि सः इतस्ततः निश्शंकः भूत्वा अभ्रमत् । एकदा सः कञ्चित् सिंहमपश्यत् । सिंहात् भीतः सः इत्थम् अधावत् यत् सः निश्श्वसितः इव भूत्वा महर्षेः सम्मुखं प्रार्थनामकरोत्—"महर्षे, सिंहः मां खादितुमिच्छतीति ।"



तदा महर्षिः तम् सिंहमकरोत् । सः सिंहः वने सर्वत्र अभ्रमत् । सर्वे मृगाः तम् अनमन् । सः मृगेन्द्रः अभवत् । क्रमेण सः महोन्मत्तः अभवत् । एकस्मिन् दिने महर्षिं दृष्ट्वा अचिन्तयत्–"कदाचित् एषः मां निन्देत् यत् एषः सिंहः पूर्वं मूषकः आसीत् । तदा कथं न एतमेव नाशयेयम्" इति ।

एवं चिन्तयित्वा सः महर्षिं प्रति अचलत् । तस्य सिंहस्य ईदृशं विचारम् अवगत्य महर्षिः तम् अशपत्–

"पुनः मूषकः भव"

तदा सः सिंहः पुनः मूषकः अभवत् ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| महर्षिः | = | महान् ऋषि | (great sage) |
| उप+गम् (गच्छ्) | = | पास जाना | (to go near) |
| उद्यत | = | तैयार | (ready) |
| भीत | = | डरा हुआ | (frightened) |
| निश्शंक | = | निडर | (fearless) |
| इत्थम् | = | इस प्रकार | (thus) |
| निश्श्वसित | = | फूले हुए साँस वाला | (one out of breath) |
| सम्मुखम् | = | सामने | (in front of) |
| प्रार्थना | = | प्रार्थना | (request) |

| | | | |
|---|---|---|---|
| मृगेन्द्रः | = | पशुओं का राजा | (king of animals) |
| क्रमेण | = | धीरे-धीरे | (gradually) |
| महोन्मत्त | = | बड़ा अभिमानी | (very proud) |
| कदाचित् | = | शायद | (perhaps) |
| पूर्वम् | = | पहले | (earlier) |
| ईदृश | = | इस प्रकार का | (of this kind) |
| विचारः | = | विचार | (thought, idea) |
| शप् | = | शाप देना | (to curse) |

धातुः शप् (2)

उपसर्ग-युक्त-धातुः उप+गम् (गच्छ्)

**विशेषणानि**

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| उद्यतः | उद्यता | उद्यतम् |
| भीतः | भीता | भीतम् |
| निश्शंकः | निश्शंका | निश्शंकम् |
| निश्श्वसितः | निश्श्वसिता | निश्श्वसितम् |
| उन्मत्तः | उन्मत्ता | उन्मत्तम् |
| ईदृशः | ईदृशी | ईदृशम् |

**अव्ययाः**

इत्थम्, सम्मुखम्, क्रमेण, कदाचित्

**उपपद-विभक्तिः**

जिससे डर लगे, उसके वाचक शब्द में पञ्चमी विभक्ति (The word expressing the source of fear takes पञ्चमी विभक्ति).

**विशेषः**

इन शब्दों के दो-दो अर्थ हैं । ध्यान दीजिए (Note the following words. They have two meanings each)—

क्रमेण = बारी-बारी, धीरे-धीरे (by turns, gradually)

कदाचित् = कभी, शायद (sometime, perhaps)

## अभ्यासः

### मौखिकम्

1. चूहे और ऋषि की कहानी अपने शब्दों में सुनाइए (Narrate the story of The Mouse and the Sage in your own words).
2. 'शप' के रूप विधिलिङ् में बोलिए (Conjugate 'शप्' in विधिलिङ्)

### लिखितम्

3. सन्धिच्छेद कीजिए (Disjoin)—
   महर्षिः उपागच्छत्, महोन्मत्तः, मृगेन्द्रः, विद्यालयः, उपेन्द्रः, नरेन्द्रः ।
4. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
   (क) विडालः प्रथमम् कस्मात् त्रस्यति स्म ?
   (ख) विडालः कुक्कुरः कथम् अभवत् ?
   (ग) सिंहः भूत्वा सः किम् अचिन्तयत् ?
   (घ) महर्षिः सिंहस्य विचारम् अवगत्य किम् अकरोत् ?
5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
   (क) बालक कुत्ते से नहीं डरा । (The child did not fear the dog.)
   (ख) प्रत्येक बालक निडर बने । (Every child should become fearless.)
   (ग) बूढ़े का साँस फूला हुआ था । (The old man was out of breath.)
   (घ) रोज़ी के लिए इस प्रकार न सोचो । (For livelihood, do not think this way.)
   (ङ) उस आदमी को धिक्कार है जो इस प्रकार सोचता है । (Curse on the person who thinks like this.) □□



Teaching Point :

(i) वृद्धि सन्धिः

त्रयोदशः पाठः

# आचार्यः चाणक्यः

वास्तव्य कृष्णवर्ण स्थूलौष्ठ दीर्घशिख शुष्ककेश कदाकार प्रतिशोधः कुत्रचित् आकृति दृढनिश्चय



भारतीये इतिहासे आचार्यस्य चाणक्यस्य नाम प्रसिद्धम् अस्ति । सः मौर्य-चन्द्रगुप्तस्य गुरुः आसीत् ।

सः तक्षशिलायाः वास्तव्यः आसीत् । तत्रैव तक्षशिला-विश्वविद्यालये तस्य शिक्षा अभवत् । कृष्णवर्णः, स्थूलौष्ठः, दीर्घशिखः, शुष्ककेशः सः ब्राह्मणः अतीव कदाकारः आसीत् ।

एकदा मगध-देशस्य नृपः नन्दः तमनिन्दत् । एतया निन्दया सः क्रुद्धः अभवत् प्रतिशोधाय च निश्चयमकरोत् । सः सर्वत्र भूमौ अभ्रमत् । कुत्रचित् सः एकं बालकमपश्यत् यः आकृत्या वीरः दृढनिश्चयः चासीत् । तस्य नाम चन्द्रगुप्तः आसीत् । चाणक्यः तं ध्यानेनापश्यत् । तं कुशलम् अवगत्य सः तं तक्षशिलाम्

अनयत् । तत्र राजनीतेः शिक्षाम् अधिगत्य सः बालकः तथैव योग्यः अभवत् यथा तस्य गुरुः तं वाञ्छति स्म ।



तौ मिलित्वैकां सेनाम् अरचयताम् । चाणक्यस्य प्रशिक्षणम् अधिगत्य सा सेना कुशला अभवत् । मगध-देशे आक्रमणं कृत्वा सा सेना नन्दम् अनाशयत् । चन्द्रगुप्तः मगधदेशस्य नृपः अभवत् ।

आचार्यः चाणक्यः कुशलः राजनीतिज्ञः आसीत् । सः 'अर्थ-शास्त्रम्' नाम राजनीतेः ग्रन्थम् अलिखत् । राजनीतिज्ञाः राजनीतेः छात्राः च अद्यापि तं ग्रन्थं पठन्ति ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| भारतीय | = | भारतीय | (Indian) |
| इतिहासः | = | इतिहास | (history) |
| वास्तव्य | = | निवासी | (inhabitant) |
| विश्वविद्यालयः | = | यूनिवर्सिटी | (university) |
| शिक्षा | = | शिक्षा | (education) |
| कृष्ण वर्ण | = | काले रंग वाला | (black-coloured) |
| स्थूलौष्ठ | = | मोटे होंठ वाला | (thick-lipped) |
| दीर्घशिखः | = | लम्बी चोटी वाला | (with a long lock of hair on the head) |

| | | |
|---|---|---|
| शुष्ककेशः | = सूखे बालों वाला | (dry-haired) |
| कदाकारः | = बदसूरत | (ugly) |
| क्रुद्ध | = क्रोधित | (angry) |
| प्रतिशोधः | = बदला | (revenge) |
| निश्चय | = इरादा | (determination) |
| कुत्रचित् | = कहीं | (somewhere) |
| आकृतिः | = शक्ल | (face) |
| दृढनिश्चय | = पक्के इरादे वाला | (a person with determination) |
| कुशल | = कुशल | (able, skilful) |
| राजनीतिः | = राजनीति | (politics) |
| सेना | = सेना | (army) |
| राजनीतिज्ञ | = राजनीति जानने वाला | (knower of politics) |
| ग्रन्थः | = पुस्तक | (treatise, book) |

**विशेषणानि**

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| भारतीयः | भारतीया | भारतीयम् |
| वास्तव्यः | वास्तव्या | वास्तव्यम् |
| –वर्णः | –वर्णा | –वर्णम् |
| –ओष्ठः | –ओष्ठा | –ओष्ठम् |
| –शिखः | –शिखा | –शिखम् |
| –केशः | –केशा | –केशम् |
| कदाकारः | कदाकारा | कदाकारम् |
| क्रुद्धः | क्रुद्धा | क्रुद्धम् |
| निश्चयः | –निश्चया | –निश्चयम् |
| कुशलः | कुशला | कुशलम् |
| राजनीतिज्ञः | राजनीतिज्ञा | राजनीतिज्ञम् |

**अव्ययः** कुत्रचित्

## अभ्यासः

### मौखिकम्

1. उचित विभक्ति लगाइए (Provide the appropriate विभक्ति)—
(कृष्णवर्ण) मित्राणि , (कदाकार) नरौ
(शुष्ककेश) बालिका , (भारतीय) महापुरुषाः
(कुशल) सौचिकः , (राजनीतिज्ञ) जनानाम्

2. अर्थ बताइए (Give meanings)—
कुत्र, कुत्रचित्, राजनीतिः, राजनीतिज्ञः, वास्तव्यः, आकृतिः ।

### लिखितम्

3. सन्धिच्छेद कीजिए (Disjoin)—
तत्रैव, स्थूलौष्ठः, सर्वत्रैव, अद्यैव, राजेन्द्रः

4. संधि कीजिए (Join)—
अत्र+एव, देव+ऋषिः, महा+औषधम्, महा+उत्सवः

5. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
   (क) आचार्यः चाणक्यः कः आसीत् ?
   (ख) चाणक्यः नन्दं नाशयितुं किमर्थम् अचिन्तयत् ?
   (ग) चाणक्यः नन्दं नाशयितुं किमकरोत् ?
   (घ) चाणक्यः किम् पुस्तकम् अलिखत् ?

6. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
   (क) आचार्य चाणक्य काले रंग के थे । (Acharya Chanakya had a black complexion.)
   (ख) उन्होंने सब जगह घूम कर चन्द्रगुप्त को पाया । (He went around and found Chandragupta.)
   (ग) गुरु और शिष्य दृढ़ निश्चय वाले थे । (The teacher and the disciple were persons of strong determination.)
   (घ) उन्होंने मिलकर एक सेना बनाई । (They together made an army.) □□

चतुर्दशः पाठः

# श्लोकाः

उद्यमः सिध् (सिध्य्) मनोरथः नहि अलसः कुतः अविद्य अधन वचन-द्वयम् परोपकारः पुण्यम् पापम् परपीडनम् वाणी रसवती श्रमवती क्रिया लक्ष्मीः दानवती जीवितम् दानम् कण्ठः श्रोत्रम् शास्त्रम् प्रयोजनम्



उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः ।
नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ 1 ॥

अलसस्य कुतः विद्या, अविद्यस्य कुतः धनम् ।
अधनस्य कुतः मित्रम्, अमित्रस्य कुतः सुखम् ॥ 2 ॥

अष्टादश पुराणेषु, व्यासस्य वचन-द्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥ 3 ॥

वाणी रसवती यस्य, यस्य श्रमवती क्रिया ।
लक्ष्मीः दानवती यस्य, सफलम् तस्य जीवितम् ॥ 4 ॥

हस्तस्य भूषणम् दानम्, सत्यम् कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणम् शास्त्रम्, भूषणैः किंप्रयोजनम् ॥ 5 ॥

## शब्दार्थाः

| | | | |
|---|---|---|---|
| उद्यमः | = | परिश्रम | (hard work) |
| सिध् (सिध्य्) | = | सिद्ध होना | (to get done) |
| मनोरथः | = | इच्छा | (wish) |
| नहि | = | नहीं | (not) |
| अलस | = | आलसी | (lazy) |
| कुतः | = | कहाँ | (where) |
| अविद्य | = | विद्या-हीन | (uneducated) |
| अधन | = | धन-हीन | (one without wealth) |
| वचन-द्वयम् | = | दो शब्द | (two words) |
| परोपकारः | = | दूसरों की भलाई | (good of others) |
| पुण्यम् | = | पुण्य | (religious merit) |
| पापम् | = | पाप | (sin) |
| परपीडनम् | = | दूसरों को सताना | (bothering others) |
| वाणी | = | बोलना | (speech) |
| रसवती | = | मिठास से भरी | (full of sweetness) |
| श्रमवती | = | परिश्रम से पूर्ण | (full of hardwork) |
| क्रिया | = | काम | (action) |
| लक्ष्मीः | = | धन, धन की देवी | (wealth, goddess of wealth) |
| दानवती | = | दान युक्त | (full of charity) |
| जीवितम् | = | जीवन | (life) |
| दानम् | = | देना, दान | (giving, charity) |
| कण्ठः | = | गला | (throat) |
| श्रोत्रम् | = | कान | (ear) |
| शास्त्रम् | = | शास्त्र | (scripture) |
| प्रयोजनम् | = | उद्देश्य | (purpose) |

**धातु:** सिध् (सिध्य्) (2)

**रूपाणि**

लक्ष्मीः – 'नदी' के समान (like नदी) (पृष्ठ 94)

**नोट**– प्रथमा विभक्ति एकवचन में 'लक्ष्मी' में विसर्ग है परन्तु 'नदी' में नहीं । इस अन्तर के अतिरिक्त शेष रूप समान हैं (The declension of लक्ष्मी is like नदी with

one exception : प्रथम वि० Singular has विसर्ग)

विशेषणानि

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| अलसः | अलसा | अलसम् |
| अविद्यः | अविद्या | अविद्यम् |
| अधनः | अधना | अधनम् |

अव्ययः नहि, कुतः

## अभ्यासः

मौखिकम्

1. 'कुतः' शब्द के दो अर्थ हैं। निम्नलिखित वाक्यों को पढ़ कर दोनों अर्थ ढूँढिये (कुतः has two different meanings. Read the following and find out)—
बालकः कुतः आगच्छति ? अविद्यस्य कुतः धनम् ?

2. पुँल्लिग, स्त्रीलिंग, नपुँसकलिंग शब्द अलग-अलग कीजिए (Separate words of three genders)
उद्यमः, मनोरथः, अधना, प्रयोजनम्, परोपकारः, पुण्यम्, पापम, वाणी, जीवितम्, श्रोत्रम्, शास्त्रम्, अविद्यः, कण्ठः।

लिखितम्

3. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
(क) कार्याणि कथं सिध्यन्ति ?
(ख) सुखम् कः विन्दति ?
(ग) व्यासस्य वचन-द्वयम् किम् अस्ति ?
(घ) कस्य जीवितं सफलम् ?
(ङ) कण्ठस्य भूषणं किम् अस्ति ?

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
(क) संसार में आलसी कभी उन्नति नहीं करता। (In the world, a lazy person does not progress.)
(ख) यह दूसरा लड़का कौन है ? (Who is this second boy?)
(ग) धन-हीन का जीवन सफल नहीं होता। (The life of a person without money is not successful.)
(घ) शास्त्रों का प्रयोजन परोपकार है। (The purpose of scriptures is to do good to others.)
(ङ) हमारी वाणी सदैव रसवती हो। (Let our speech be always sweet!)

*Teaching Point :*

(i) भगवत्-declension

पञ्चदशः पाठः

# गीतायाः उपदेशः

युद्धभूमिः सम्+वद् (संवद्) भगवत् विद्यावत् चापः युद्धवेला धनुष्मत् साम्प्रतम् निश्चयवत् आत्मा जीर्ण नवीन भाग्यवत् निष्काम-भावना अर्थः



(कुरुक्षेत्रस्य युद्धभूमिः । कृष्णः अर्जुनः च संवदतः)

**अर्जुनः–** भगवन् ! अहम् एतान् बन्धून् नाशयितुम् नेच्छामि । तत्र विद्यावन्तः आचार्याः अपि तिष्ठन्ति । अहम् तान् कथं मारयेयम् ?

(इति कथयित्वा अर्जुनः चापं बाणं च क्षिपति)

**कृष्णः–** एषा युद्धवेला अस्ति । एषा दुर्बलता धनुष्मति त्वयि न साम्प्रतम् । उत्तिष्ठ । युद्धाय निश्चयवान् भव !

**अर्जुनः–** सः भीष्मः सः च द्रोणः । तौ पूजनीयौ आचार्यौ । ते कौरवाः अपि अस्माकं बन्धवः । राज्यस्य कृते वयं तान् कथं नाशयेम ?

**कृष्णः–** भो अर्जुन, आत्मा अमरः अस्ति । आत्मा कदापि न नश्यति । यथा नरः जीर्णानि वस्त्राणि त्यजति, नवीनानि च धारयति, तथैव आत्मा अपि जीर्णानि शरीराणि त्यजति, नवीनानि च धारयति । अर्जुन, उत्तिष्ठ !

भाग्यवन्तः क्षत्रियाः एव ईदृशं युद्धं विन्दन्ति । एतेन तव कीर्तिः सर्वत्र प्रसरिष्यति ।



अर्जुनः– यदि अहं कस्यचित् अपि प्राणान् हरामि, तदा पापं विन्दामि ।

कृष्णः– निष्काम-भावनया यदि त्वं कार्यं करिष्यसि, तदा पापं न वेदिष्यसि । निष्काम-भावनायाः एषः अर्थः यत् कार्यं तु कुरु परं तस्य फलं मा इच्छ ।

(इति आकर्ण्य अर्जुनः युद्धाय उत्तिष्ठति)

**शब्दार्थाः**

| | | | |
|---|---|---|---|
| युद्धभूमिः | = | युद्ध का मैदान | (battle-field) |
| सम्+वद् (संवद्) | = | बातचीत करना | (to talk to each other) |
| भगवत् | = | भगवान् | (God) |
| विद्यावत् | = | विद्वान | (learned person) |
| चापः | = | धनुष | (bow) |
| युद्धवेला | = | युद्ध का समय | (time of war) |
| दुर्बलता | = | कमज़ोरी | (weakness) |
| धनुष्मत् | = | धनुषधारी | (archer) |
| साम्प्रतम् | = | उचित | (proper) |
| निश्चयवत् | = | निश्चय-युक्त | (determined) |
| पूजनीय | = | पूज्य | (respectable) |

| | | |
|---|---|---|
| कृते | = लिए | (for) |
| आत्मा | = आत्मा | (soul) |
| अमरः | = अमर (जो नष्ट न हो) | (immortal) |
| जीर्ण | = फटा हुए | (torn) |
| नवीन | = नया | (new) |
| भाग्यवत् | = भाग्यवान् | (lucky) |
| निष्काम–भावना | = फल-कामना से रहित | (without desire for the fruit) |
| अर्थः | = मतलब | (meaning) |

उपसर्गयुक्त-धातु: सम्+वद् (संवद्) (1)

### रूपाणि

भगवत् विद्यावत्, धनुष्मत्, निश्चयवत्, भाग्यवत् (पृष्ठ 94-95)

### विशेषणानि

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| –वत् | –वती | वत् |
| जीर्णः | जीर्णा | जीर्णम् |
| नवीन | नवीना | नवीनम् |

अव्ययाः साम्प्रतम्, कृते

## अभ्यासः

### मौखिकम्

1. दो बालक मिलकर इस पाठ को नाटक के रूप में प्रस्तुत करें (Two children may role-play it together).
2. निम्नलिखित शब्दों के अर्थ बताइए (Give meanings of the following)—
चापः, असाम्प्रतम्, यथा, तप्, यथाशक्ति, राज्ञी ।

### लिखितम्

3. निर्दिष्ट विभक्ति के रूप सामने लिखिए (Give forms in front as asked)
भगवत् (द्वितीया) .................... .................... ....................
धनुष्मत् (चतुर्थी) .................... .................... ....................

भाग्यवत् (षष्ठी) ........................ ........................ ........................
विद्यावत् (तृतीया) ........................ ........................ ........................

4. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
   (क) कृष्णः अर्जुनं कुत्र उपादिशत् ?
   (ख) अर्जुनः कृष्णाय किम् अकथयत् ?
   (ग) कृष्णस्य उपदेशः कः अस्ति ?
   (घ) निष्काम-भावनायाः कः अर्थः अस्ति ?

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
   (क) भगवान् कृष्ण के उपदेश गीता में हैं। (Lord Krishna's teachings are in the Gita.)
   (ख) विद्वान के लिए यह अनुचित है। (This is inappropriate for a scholar.)
   (ग) आत्मा नया शरीर धारण करता है। (Soul adopts a new body.)
   (घ) भगवती दुर्गा की पूजा पापों को नष्ट करती है। (Worship of goddess Durga destroys sins.)
   (ङ) भाग्यवाली स्त्रियाँ ही कीर्ति पाती हैं। (Fortunate women alone earn fame.)

□□



*Teaching Point :*

-तर, -तम suffixes

षोडशः पाठः

# स्वदेश-परिचयः

**दृढ मातृभूमिः पितृभूमिः पुण्यभूमिः कर्मभूमिः अधिक संकल्पः परिचयः निम्नलिखित राष्ट्रिय - ध्वजः त्रिवर्णः चिह्नम् वाक्यम् पशुः खेलः**



भारतम् अस्मभ्यम् स्वर्गात् अपि प्रियतरम् । अत्रैव उषित्वा वयं जीवनस्य सर्वं सुखम् विन्दामः । भारतस्यैव नदीनां जलं पीत्वा, भारतस्यैव क्षेत्राणाम् अन्नं खादित्वा अस्माकं शरीराणि दृढ-तराणि अभवन् । भारतमेव अस्माकं मातृभूमिः, पितृभूमिः, पुण्यभूमिः, कर्मभूमिः चास्ति । भारतस्य उन्नत्यै एव अस्माकं समयस्य धनस्य च अधिकतमः उपयोगः भवेत् इति अस्माकं संकल्पः । सर्वेषु देवेषु भारतम् एव उच्चतमः देवः । राष्ट्रदेवः भव ।

भारतस्य परिचयाय निम्नलिखितं ज्ञानम् आवश्यकमस्ति–

1. राष्ट्रिय-ध्वजः – त्रिवर्णः
2. राष्ट्रिय-गीतम् – जन गण मन अधिनायक जय हे
3. राष्ट्रिय-चिह्नम् – त्रयः सिंहाः
4. राष्ट्रिय-वाक्यम् – सत्यमेव जयते नानृतम्

5. राष्ट्रिय-खगः – मयूरः
6. राष्ट्रिय-पशुः – सिंहः
7. राष्ट्रिय-खेलः – हॉकी
8. राष्ट्रिय-पुष्पम् – कमलम्



जन-गण-मन अधिनायक जय हे,
भारत-भाग्य विधाता।
पंजाब सिन्धु गुजरात मराठा द्राविड़ उत्कल बंग,
विन्ध्य हिमाचल यमुना गंगा उच्छल जलधितरंग,
तव शुभ नामे जागे, तव शुभ आशिष माँगे,
गाहे तव जय गाथा।
जन-गण-मंगलदायक जय हे,
भारत भाग्य विधाता।
जय हे। जय हे। जय हे।
जय जय जय जय हे, भारत-भाग्य विधाता।





एतेषाम् अधिकतरं ज्ञानं वयं विन्दाम। बुद्धिमत्तराः जनाः एव स्वस्य देशस्य सेवां कर्तुं समर्थाः भवन्ति।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| दृढ | = | मज़बूत | (strong) |
| मातृभूमि | = | मातृभूमि | (motherland) |
| पितृभूमिः | = | पितृभूमि | (fatherland) |
| पुण्यभूमि | = | पवित्र भूमि | (sacred land) |
| कर्मभूमिः | = | कर्मभूमि | (land of actions) |
| अधिक | = | ज़्यादा | (more) |
| संकल्प | = | पक्का इरादा | (determination) |
| उच्च | = | ऊँचा | (high) |
| राष्ट्रदेवः | = | राष्ट्र को देवता मानने वाला | (one who regards the nation as god) |
| परिचयः | = | परिचय | (introduction, basic information) |
| निम्नलिखित | = | नीचे लिखा | (undermentioned) |

| | | | |
|---|---|---|---|
| राष्ट्रिय | = | राष्ट्रीय | (national) |
| ध्वजः | = | झण्डा | (flag) |
| त्रिवर्णः | = | तिरंगा | (tri-coloured) |
| चिह्नम् | = | निशान | (emblem) |
| वाक्यम् | = | वाक्य | (sentence) |
| पशुः | = | पशु | (animal) |
| खेलः | = | खेल | (game) |
| बुद्धिमत् | = | बुद्धिमान् | (wise) |

नोट–सत्यमेव जयते नानृतम् (सत्यम् एव जयते न अनृतम्) = सच ही जीतता है, झूठ नहीं । इस वाक्य में प्रयुक्त 'जयते' ऋषियों द्वारा प्रयोग होने के कारण ठीक मान लिया गया है । वैसे 'जि' धातु का शुद्ध रूप 'जयति' बनता है ।

जयते in (सत्यमेव जयते is considered correct because it was used by sages. However, the grammatical form in classical Sanskrit is 'जयति'

## विशेषणानि

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| दृढः | दृढा | दृढम् |
| अधिकः | अधिका | अधिकम् |
| उच्चः | उच्चा | उच्चम् |
| राष्ट्रदेवः | राष्ट्रदेवा | राष्ट्रदेवम् |
| –लिखितः | –लिखिता | –लिखितम् |
| राष्ट्रियः | राष्ट्रिया | राष्ट्रियम् |
| त्रिवर्णः | त्रिवर्णा | त्रिवर्णम् |

## -तर, -तम

| | | | |
|---|---|---|---|
| पुं०– | दृढः | दृढतरः | दृढतमः |
| स्त्री०– | दृढा | दृढतरा | दृढतमा |
| नपुं०– | दृढम् | दृढतरम् | दृढतमम् |

इसी प्रकार -तर, -तम को अन्य विशेषणों में भी जोड़िए।

## उपपद-विभक्तिः

(i) दो की तुलना में, जिससे तुलना की जाए, उसमें पञ्चमी विभक्ति आती है । (Between two, the word for the one being compared with gets पञ्चमी विभक्ति

(ii) दो से अधिक की तुलना में, जिससे तुलना की जाए, उसमें षष्ठी या सप्तमी विभक्ति आती है (Among more than two, the word for those being compared with gets षष्ठी or सप्तमी विभक्ति ).

## अभ्यासः

### मौखिकम्

1. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
   (क) राष्ट्रियः खेलः कः अस्ति ?
   (ख) राष्ट्रियः पशुः कः अस्ति ?
   (ग) राष्ट्रियं पुष्पं किम् अस्ति ?
   (घ) राष्ट्रियं वाक्यं किम् अस्ति ?

2. शब्दों का अर्थ बताइए (Give meanings)—
   त्रिवर्णः, कर्मभूमिः, ध्वजः, इत्थम्, एवंविधः

### लिखितम्

3. कोष्ठ में दिए शब्दों में पंचमी, षष्ठी या सप्तमी में से विभक्ति लगाइए (Provide पञ्चमी, षष्ठी or सप्तमी वि० whichever is appropriate for the words within parenthesis)—

| | | |
|---|---|---|
| | (पुष्प) | कमलम् सुन्दरतमम् । |
| (एतत्) | (खग) | मयूरः सुन्दरतमः । |
| | (देश) | भारतम् सुन्दरतमम् । |
| | (पुस्तक) | गीता उच्चतमा । |
| | (राम) | कृष्णः बुद्धिमत्तरः । |

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
   (क) उसके शरीर से मेरा शरीर अधिक मज़बूत है । (My body is stronger than his.)
   (ख) भारतीय खेलों में कबड्डी सबसे प्रसिद्ध है । (In Indian games, Kabaddi is the most well-known.)
   (ग) इस घोड़े से मेरा घोड़ा ज्यादा तेज़ है । (My horse is faster than this horse.)
   (घ) यह बालक उससे ज़्यादा बुद्धिमान् है । (This boy is more intelligent than that.)

□□

*Teaching Point :*

(i) सर्व अनेक– declension

सप्तदशः पाठः

# संस्कृत-भाषा

**भाषा प्राचीन साहित्यम् वर्जय् यद्यपि तथापि पोषय् शब्दः लिखित धार्मिक दर्शनम् कथा विज्ञानम् वैद्यकम् काव्यम् कृतिकारः मूर्ध्नि स्थापय्**




**संस्कृतम् प्राचीनतमा भाषा अस्ति । संस्कृतस्य साहित्यमपि संसारे सर्वेषां साहित्यानां प्राचीनतमम् अस्ति ।**

**दक्षिण-भारतस्य चतस्रः भाषाः वर्जयित्वा सर्वासां भारतीयानां भाषाणां जननी संस्कृतमेव अस्ति । यद्यपि तमिल-तेलगु-कन्नड-मलयालम्-भाषाणां न सा जननी परं तथापि संस्कृतेन ताः पोषिताः । तासु सर्वासु भाषासु अनेकान् संस्कृत-शब्दान् पश्यामः ।**

**संस्कृते लिखिताः वेदाः, उपनिषदः, पुराणानि च हिन्दूनाम् अनेके धार्मिकाः ग्रन्थाः सन्ति । वेदाः चत्वारः सन्ति–ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः च । संस्कृते एव वाल्मीकेः रामायणम् वेदव्यासस्य महाभारतं चापि पश्यामः । गीता महाभारतस्यैव एकम् अंगमस्ति ।**



संस्कृते दर्शन-साहित्यस्य, कथा-साहित्यस्य, विज्ञान-साहित्यस्य वैद्यक-साहित्यस्य च अनेके ग्रन्थाः सन्ति । भारते अनेके कवयः अभवन् ये नाटकानि काव्यानि च संस्कृत-भाषायां अलिखन् ।

भासः, कालिदासः, बाणभट्टः, हर्षः, भवभूतिः, दण्डी, भारविः, माघः, शूद्रकः, विशाखदत्तः, जयदेवः, विष्णुशर्मा च अनेके कृतिकाराः संस्कृतं सर्वेषां साहित्यानां मूर्ध्नि अस्थापयन् ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| भाषा | = | भाषा | (language) |
| प्राचीन | = | पुराना | (old) |
| साहित्यम् | = | साहित्य | (literature) |
| वर्जय् | = | छोड़ना | (excepting) |
| यद्यपि | = | बेशक | (although) |
| तथापि | = | तो भी | (even then) |
| पोषय् | = | पुष्ट करना | (to nourish) |
| शब्दः | = | शब्द | (word) |
| लिखित | = | लिखा हुआ | (written) |
| धार्मिक | = | धार्मिक | (religious) |

| | | | |
|---|---|---|---|
| दर्शनम् | = | दर्शन | (philosophy) |
| कथा | = | कहानी | (story) |
| विज्ञानम् | = | विज्ञान | (science) |
| वैद्यकम् | = | चिकित्सा विज्ञान | (medical science) |
| काव्यम् | = | काव्य | (poetry) |
| कृतिकारः | = | लेखक | (author) |
| मूर्ध्नि स्थापय् | = | सबसे ऊपर स्थापित करना | (to establish at the top) |

धातुः वर्जय् (1) पोषय् (1)

रूपाणि सर्व, अनेक–किम् के सामान (पृष्ठ 96-97)

विशेषणाणि

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| प्राचीनः | प्राचीना | प्राचीनम् |
| लिखितः | लिखिता | लिखितम् |
| धार्मिकः | धार्मिकी | धार्मिकम् |

अव्ययाः यद्यपि, तथापि

मुहावरा (Idiom)— मूर्ध्नि स्थापय्

## अभ्यासः

मौखिकम्

1. भारत में बोली जाने वाली दस भाषाओं के नाम बताइए (Name ten languages spoken in India).
2. अर्थ बताइए (Give meanings)—
   कृतिकारः, वैद्यकम्, कथाकारः, कुतः, विज्ञानम्, मनोरथः ।

लिखितम्

3. कोष्ठक में दिए गए शब्दों में उचित विभक्ति लगाइए (Provide appropriate vibhakti to words within parenthesis)—

(क) संस्कृत-साहित्यं–(सर्व) साहित्यानां प्राचीनतमम् ।
(ख) संस्कृतम् एव–(सर्व) भाषाणां जननी अस्ति ।
(ग) कालिदासस्य–(सर्व) काव्यानि संस्कृते एव ।
(घ) संस्कृतस्य–(अनेक) शब्दाः भारतीय-भाषासु सन्ति ।
(ङ) संस्कृते लिखितानि–(अनेक) नाटकानि सन्ति ।
(च) भारते–(अनेक) भाषाः सन्ति ।

4. विभक्ति और वचन बताइए (Tell the vibhakti and number in each word)--
हिन्दूनाम्, सर्वे, अनेकासु, साहित्यस्य, अनेकाभिः, सर्वस्यै ।

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
(क) संस्कृत एक प्राचीन भाषा है । (Sanskrit is an old language.)
(ख) यह भाषा भारतीय भाषाओं की जननी है । (This language is mother of Indian languages.)
(ग) कालिदास सब लेखकों से ऊपर हैं । (Kalidas is the best of all writers.)
(घ) गीता महाभारत का एक अंग है ।(The Gita is a part of the Mahabharata.)
(ङ) अनेक नाटकों और काव्यों को हम पढ़ते हैं और पढ़ेंगे । (We read and will read many plays and poetical compositions.)



*Teaching Point :*

(i) यण्-सन्धिः

अष्टादशः पाठः

# रमेशस्य-जन्मदिवसः

**प्रतीक्षा उपहारः बहुमूल्य आयुष्मत् करः कार्यक्रमः सत्यम् दत्तध्यान पश्चात् करतल-ध्वनिः आनन्दः दिवस उदरस्थ मिष्टान्नम् प्रसन्नमुख**



रमेशः– **स्वागतम् ! स्वागतम् ! प्रियाणि मित्राणि, आगच्छत । युष्माकमेव प्रतीक्षायाम् अहमत्र स्थितः ।**

देवेन्द्रः– **एषः मम उपहारः । स्वीकुरु ।**

(रमेशः उपहारं स्वीकरोति । अन्यान्यपि मित्राणि उपहारान् यच्छन्ति । तान्यपि रमेशः स्वीकरोति)

रमेशः– **बहुमूल्याः एते उपहाराः । प्राणेभ्यः अपि मम प्रियतराः ! उपविश ! उपविश!**

(रमेशस्य जनकः प्रविशति)

जनकः– **रमेश ! दिष्ट्या वर्धसे । आयुष्मान् भव ! विद्यावान् भव !**

(रमेशस्य मित्राण्यपि उत्तिष्ठन्ति जनकं च कराभ्यां नमन्ति)

जनकः— आयुष्मन्तः भवत । उपविशत !
विवेकः— रमेश, अद्य कः कार्यक्रमः ?
रमेशः— यूयम् सर्वे नृत्यत गायत च । एषः एव कार्यक्रमः ।

(सर्वे हसन्ति)

प्रदीपः— रमेश, त्वं तु उपहससि । परम् अहं सत्यमेव गातुम् इच्छामि । किं गायानि ?
रमेशः— अलं पृष्ट्वा । यथेच्छं गाय ।

(प्रदीपः गायति । सर्वे दत्तध्यानाः तम् आकर्णयन्ति । गीतस्य पश्चात् सर्वे करतल-ध्वनिं कुर्वन्ति)



अमरः— अद्य तु कश्चित् नृत्यतु अपि । आनन्दस्य एषः दिवसः ।
प्रदीपः— अथ किम् ! आगच्छत, वयं सर्वे एव नर्तिष्यामः ।

(सर्वे नृत्यन्ति, गायन्ति हसन्ति च)

रमेशः— श्रान्ताः यूयं सर्वे । अधुना आगच्छत । एतानि मिष्टान्नान्यपि उदरस्थानि कुरुत ।

(प्रसन्नमुखानि मित्राणि आगच्छन्ति मिष्टानानि च आतृप्ति खादन्ति ।)

## शब्दार्थाः

| | | | |
|---|---|---|---|
| प्रतीक्षा | = | इन्तज़ार | (wait) |
| उपहारः | = | तोहफ़ा | (gift) |

| | | | |
|---|---|---|---|
| बहुमूल्य | = | बहुत कीमती | (valuable) |
| दिष्ट्या वर्धसे | = | बधाई हो | (congratulations) |
| आयुष्मत् | = | दीर्घायु | (having a long life) |
| करः | = | हाथ | (hand) |
| कार्यक्रमः | = | कार्यक्रम, प्रोग्राम | (programme) |
| सत्यम् | = | सचमुच | (truly) |
| यथेच्छम् | = | इच्छानुसार | (as much as you want) |
| दत्तध्यानः | = | ध्यान देकर | (attentive) |
| पश्चात् | = | बाद में | (after) |
| करतल-ध्वनिः | = | ताली की आवाज़ | (clapping) |
| आनन्दः | = | आनन्द | (happiness) |
| दिवसः | = | दिन | (day) |
| उदरस्थ | = | पेट में डालना | (swallow) |
| मिष्टान्नम् | = | मिठाई | (sweet, candy) |
| प्रसन्नमुख | = | प्रसन्न मुख वाला | (one with a happy face) |

**विशेषणानि**

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| बहुमूल्यः | बहुमूल्या | बहुमूल्यम् |
| आयुष्मान् | आयुष्मती | आयुष्मत् |
| दत्तध्यानः | दत्तध्याना | दत्तध्यानम् |
| उदरस्थः | उदरस्था | उदरस्थम् |
| प्रसन्नमुखः | प्रसन्नमुखा | प्रसन्नमुखम् |

**अव्ययाः** सत्यम्, पश्चात्

**उपपद-विभक्तिः**

'पश्चात्' के योग में जो शब्द आता है, उसमें षष्ठी विभक्ति लगती है (The word accompanying पश्चात् gets the षष्ठी विभक्ति)

**मुहावरा (Idiom)** दिष्ट्या वर्धसे

**विशेषः**

सत्यम् (संज्ञा के रूप में) (as a noun) = सच (truth)

(क्रियाविशेषण के रूप में) (as an adverb) = सचमुच (truly)

## अभ्यासः

### मौखिकम्

1. स्त्रीलिंग रूप बताइए (Tell the feminine form)—
प्रसन्नमुखः, बुद्धिमत्तरः, नवीनः, अधनः, भारतीयः, स्थूलौष्ठः, ईदृशः ।

### लिखितम्

2. सन्धि या सन्धिच्छेद कीजिए (Join or Disjoin as the case may be)—
तान्येव, इति + आदि, मिष्टान्नानि + अपि, फलानि + इच्छति, त्वमुपहससि, गुरु + आज्ञा ।

3. अपनी छोटी बहन के जन्म-दिवस की कल्पना कीजिए और उसका संस्कृत में संक्षिप्त विवरण दीजिए । (Imagine your younger sister's birthday and describe it in Sanskrit.)

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
   (क) मेरा जन्म-दिन कल होगा । (My birthday will be tomorrow.)
   (ख) तुम्हारे मित्र भी आएँगे । (Your friends too will come.)
   (ग) आइए, गाएँ और नाचें । (Come on, let's sing and dance.)
   (घ) सचमुच ये फल भी बहुत मीठे हैं । (These fruits too are truly very sweet.)
   (ङ) आज तुम्हारा जन्म-दिन है, बधाई हो । (Today is your birthday. Congratulations!) □□



*Teaching Point :*

(i) दातृ– declension

नवदशः पाठः

# लोभस्य परिणामः

लोभः परिणामः व्याघ्रः तीरम् स्वर्णम् कंकणम् गन्तृ दातृ श्रोतृ विश्वासः हन्तृ दर्शय् चिन्तयितृ मुग्ध स्रष्ट्द हिंसा कारणम् दानशील होतृ महापंकः निमग्न



कश्चित् वृद्धः व्याघ्रः आसीत् । सः नद्याः तीरे अतिष्ठत् । तस्य हस्ते स्वर्ण-कंकणम् आसीत् । सः अवदत्–भोः भोः गन्तारः, तिष्ठत, स्वर्ण-कंकणस्य दाता अहम् अत्र तिष्ठामि । एतत् अधिगच्छत ।

परं कस्यापि श्रोतुः तस्मिन् विश्वासः नाभवत् । सर्वे अचिन्तयन्–सर्वेषां हन्ता एषः स्वर्ण-कंकणस्य लोभं दर्शयतीति । एवं चिन्तयितारः ते व्याघ्रात् भयभीताः अभवन् द्राक् च ततः अधावन् ।

तदा कश्चित् मुग्धः ब्राह्मणः तत्र आगच्छत् । तमपि व्याघ्रः तथैवावदत् । ब्राह्मणः अचिन्तयत्–भाग्येनैव एतत् सम्भवति । स्रष्टुः आज्ञां विना नेदृशः दाता सम्भवति । ब्राह्मणस्य विश्वासं दृढतरं कर्तुं व्याघ्रः अवदत्–हिंसायाः कारणात् मम सर्वः परिवारः अनश्यत् । अधुना दानशीलः होता चाहं धर्ममाचरामि ।



ब्राह्मण विश्वास-युक्तं दृष्ट्वा व्याघ्रः पुनः अकथयत्–नद्यां स्नानं कृत्वा एतत् कंकणम् अधिगच्छ येनाहं पुण्यम् अर्जेयम् ।

मुग्धः ब्राह्मणः नदीं प्राविशत् । तत्र सः महापंके च निमग्नः अभवत् । तम् ईदृशं दृष्ट्वा व्याघ्रः तमुपागच्छत् उदरस्थं चाकरोत् ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| लोभः | = | लालच | (greed) |
| परिणामः | = | परिणाम | (result) |
| व्याघ्रः | = | बाघ | (tiger) |
| तीरम् | = | किनारा | (shore) |
| स्वर्णम् | = | सोना | (gold) |
| कंकणम् | = | कड़ा, कंगन | (bangle) |
| गन्तृ | = | जाने वाला | (goer) |
| दातृ | = | देने वाला | (giver) |
| श्रोतृ | = | सुनने वाला | (listener) |
| विश्वास | = | विश्वास | (trust) |
| हन्तृ | = | मारने वाला | (killer) |
| दर्शय् | = | दिखाना | (to show) |
| चिन्तयितृ | = | सोचने वाला | (one who thinks) |

| | | | |
|---|---|---|---|
| मुग्धः | = | भोला | (innocent) |
| स्रष्टृ | = | पैदा करने वाला | (creator) |
| हिंसा | = | हिंसा | (violence) |
| कारणम् | = | कारण | (cause) |
| दानशील | = | दान देने वाला | (generous) |
| होतृ | = | हवन करने वाला | (one who worships the fire) |
| धर्मः | = | धर्म | (righteousness, duty) |
| महापंकः | = | बड़ा कीचड़ | (great mud) |
| निमग्न | = | डूबा हुआ, फँसा हुआ | (sunk, stuck) |

**धातुः दर्शय् (1)**

**रूपाणि**

गन्तृ, दातृ, श्रोतृ, हन्तृ, चिन्तयितृ, स्रष्टृ, होतृ (पृष्ठ 95)

**विशेषणानि**

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| गन्ता | गन्त्री | गन्तृ |
| दाता | दात्री | दातृ |
| श्रोता | श्रोत्री | श्रोतृ |
| हन्ता | हन्त्री | हन्तृ |
| चिन्तयिता | चिन्तयित्री | चिन्तयितृ |
| स्रष्टा | स्रष्ट्री | स्रष्टृ |
| होता | होत्री | होतृ |
| मुग्धः | मुग्धा | मुग्धम् |
| –शीलः | –शीला | –शीलम् |
| निमग्नः | निमग्ना | निमग्नम् |

## अभ्यासः

**मौखिकम्**

1. यह कथा अपने शब्दों में सुनाइए (Tell this story in your own words)
2. अर्थ बताइए (Tell meanings)—
स्रष्टृ, तीरम्, उपहारः, वैद्यकम्, कंकणम् ।

### लिखितम्

1. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
   (क) व्याघ्रस्य हस्ते किमासीत्?
   (ख) व्याघ्रः कंकणं कस्मै दातुम् ऐच्छत्?
   (ग) व्याघ्र ब्राह्मणाय किमकथयत्?
   (घ) ब्राह्मणस्य लोभस्य कः परिणामः अभवत्?

4. अपेक्षित रूप सामने लिखिए (Give the desired forms)—

| | |
|---|---|
| श्रोतृ (तृतीया एकवचन) | ...................... |
| मुग्ध (स्त्री० सप्तमी एक व०) | ...................... |
| कृत्वा+एतत् | ...................... |
| सर्व (नपुं०, प्रथमा बहु० व०) | ...................... |
| हन्तृ (सप्तमी एक व०) | ...................... |

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
   (क) कीचड़ में जाने वालों की यही दशा होती है। (This is the condition of those who go in mud.)
   (ख) हवन करने वाले मुनि आश्रम में रहते हैं। (The sages engaged in fire worship live in a hermitage.)
   (ग) दान देने वाला जन्तु ऐसा नहीं होता। (A creature giving charity is not like this.)
   (घ) इस प्रकार सोचने वाले वे दोनों खेत में घुस गए। (Thinking thus, both of them entered into a field.)
   (ङ) कहानी सुनने वाले परस्पर बातचीत न करें। (Those listening to the story should not talk to each other.) □□



*Teaching Point :*
(i) शशिन् - declension

# विंशतितमः पाठः — चन्द्रयात्रा

अन्तरिक्षम् उपक्रमः शशिन् गमय् यत्नवत् यत्नः यानम् नेतृ अव+तृ प्रति+आ+गम् मृत्तिका पाषाणः खण्डम् कुशलिन् यशस्विन् गवेषणा ग्रहः जि (जय्)

एतत् युगम् अन्तरिक्ष-युगमस्ति। अस्य युगस्य उपक्रमः 1957-तमे वर्षे अकतूबर-मासस्य चतुर्थे दिवसे अभवत् । रूस देशीयाः वैज्ञानिकाः शशिनं प्रति प्रथमं मानव-सहितं स्पूतनिकम् 1961-तमे वर्षे अगमयन् । अन्तरिक्षस्य प्रथमः यात्री आसीत्—यूरी गगारिन महोदयः । 1968-तमे वर्षे त्रयः यात्रिणः शशिनः समीपे गन्तुं समर्थाः अभवन् ।



अमेरिका-देशस्य वैज्ञानिकाः अपि यत्नवन्तः आसन् । तेषां यत्नैः 1969-तमे वर्षे अपोलो- 11 नाम यानम् अन्तरिक्षं प्राविशत् । तत्र त्रयःयात्रिणः आसन् । यानस्य नेता आसीत्—नील-आर्मस्ट्रांग महोदयः। जुलाई-मासस्य एकविंशतितमे दिने एतत् यानं शशिनि अवातरत् ।



ते कञ्चित् कालं तत्र स्थित्वा भूमिं प्रत्यागच्छन्। ते स्वेन सह चन्द्रस्य मृत्तिकां विविधानां पाषाणानां च खण्डानि अपि आनयन् । भूमौ पुनः चन्द्रयात्रिणः कुशलिनः दृष्ट्वा विश्वस्य सर्वे जनाः भृशं प्रासीदन् ।





यशस्विनः वैज्ञानिकाः अधुना अपि अन्तरिक्षस्य गवेषणायां रताः सन्ति । अन्यान् ग्रहान् अपि जित्वा ते प्रकृतिमपि जेतुम् इच्छन्ति ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| अन्तरिक्षम् | = | अन्तरिक्ष | (space) |
| उपक्रम | = | आरम्भ | (beginning) |
| –तम | = | –वाँ | (—th) |
| चतुर्थ | = | चौथा | (fourth) |
| देशीय | = | देश का | (belonging to country) |
| वैज्ञानिकः | = | वैज्ञानिक | (scientist) |
| शशिन् | = | चन्द्रमा | (moon) |
| मानवः | = | मनुष्य | (human being) |
| गमय् | = | भेजना | (to send) |
| प्रथम | = | पहला | (first) |
| महोदय | = | महोदय | (Mr., Sir) |
| यत्नवत् | = | प्रयत्न करने वाला | (engaged in effort) |
| यत्नः | = | कोशिश | (effort) |
| नाम | = | नामक | (named) |
| यानम् | = | यान | (transportation) |
| नेतृ | = | नेता | (leader) |
| अव+तृ | = | उतरना | (to get off) |

| | | | |
|---|---|---|---|
| प्रति+आ+गम् | = | वापस आना | (to come back) |
| स्व | = | अपना | (one's ownself) |
| मृत्तिका | = | मिट्टी | (soil) |
| पाषाणः | = | पत्थर | (stone) |
| खण्डम् | = | टुकड़ा | (piece) |
| विश्वम् | = | संसार | (world) |
| यशस्विन् | = | यश वाला, विख्यात | (famous) |
| गवेषणा | = | खोज | (research) |
| ग्रहः | = | ग्रह | (planet) |
| जि (जय्) | = | जीतना | (to win) |

**धातुः**

गमय् (1) जि (जय्) (2)

**उपसर्ग-युक्त-धातू**

अव+तृ प्रति+आ+गम् (गच्छ्)

**रूपाणि**

शशिन् यात्रिन्, कुशलिन्, यशस्विन्, (पृष्ठ 95-96)

यत्नवत्– 'भगवत्' के समान (like भगवत्), (पृष्ठ 94-95)

नेतृ– 'दातृ' के समान, (like दातृ), (पृष्ठ 95)

**विशेषणानि**

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| चतुर्थः | चतुर्थी | चतुर्थम् |
| देशीयः | देशीया | देशीयम् |
| प्रथमः | प्रथमा | प्रथमम् |
| महोदयः | महोदया | महोदयम् |
| नेता | नेत्री | नेतृ |
| स्वः | स्वा | स्वम् |
| कुशली | कुशलिनी | कुशलि |
| यशस्वी | यशस्विनी | यशस्विं |

**अव्ययः** नाम

## अभ्यासः

### मौखिकम्

1. इन शब्दों को लिंगशः अलग-अलग कीजिए। (Separate these words gender-wise.)
कुशली, यत्नः, सुप्तः, सत्यम्, यशस्विनी, खण्डम्।

### लिखितम्

2. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
   (क) कः आसीत् अन्तरिक्षस्य प्रथमः यात्री?
   (ख) यात्रिणः शशिनि प्रथमं कदा अवतारन्?
   (ग) यात्रिणः शशिनः किम् आनयन्?

3. निर्दिष्ट रूप बताइए (Give the indicated forms)—
शशिन्, कुशलिन् (प्रथमा, द्वितीय, तृतीया, चतुर्थी)
यशस्विन् (पञ्चमी, षष्ठी, सप्तमी, संबोधन)

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
   (क) अमेरिका का अन्तरिक्ष यान चन्द्रमा पर गया। (America's space-craft went to the moon.)
   (ख) तीन यात्री चन्द्रमा पर उतरे। (Three astronauts got off on the moon.)
   (ग) चन्द्रयात्री चन्द्रमा की मिट्टी लाये। (The moon astronauts brought moon's soil.)
   (घ) वे जब चन्द्रमा से लौटे, तब संसार के लोगों ने उनका सम्मान किया। (When they returned from the moon, then the people of this world honoured them.) □□



*Teaching Point :*

(i) पयस् -declension

## एकविंशतितमः पाठः

## श्लोकाः

**दाराः द्रव्यम् लोष्ट भूतम् आभरणम् कोकिला तपस्विन् पुरुषकारः दैवम् वि+भा नभस् पयस् सरस्**



मातृवत् परदारेषु, परद्रव्येषु लोष्टवत् ।
आत्मवत् सर्व-भूतेषु, यः पश्यति सः पण्डितः ॥ 1 ॥

पुस्तकस्था तु या विद्या, परहस्तगतं धनम् ।
कार्यकाले समुत्पन्ने, न सा विद्या न तद्धनम् ॥ 2 ॥

नरस्याभरणं रूपं, रूपस्याभरणं गुणः ।
गुणस्याभरणं ज्ञानं, ज्ञानस्याभरणं क्षमा ॥ 3 ॥

कोकिलानां स्वरः रूपं, नारी-रूपं पतिव्रतम् ।
विद्या रूपं कुरूपाणां, क्षमा रूपं तपस्विनाम् ॥ 4 ॥

यथा त्वेकेन चक्रेण न रथस्य गतिः भवेत् ।
एवं पुरुषकारेण विना दैवं न सिध्यति ॥ 5 ॥

शशिना च निशा, निशया च शशी,
शशिना निशया च विभाति नभः ।
पयसा कमलं, कमलेन पयः,
पयसा कमलेन विभाति सरः ॥ 6 ॥

## शब्दार्थाः

| | | | |
|---|---|---|---|
| मातृ | = | माता | (mother) |
| –वत् | = | तरह | (like) |
| दाराः | = | पत्नी | (wife) |
| द्रव्यम् | = | धन | (wealth) |
| लोष्टः | = | मिट्टी का ढेला | (a lump of earth) |
| आत्मवत् | = | अपने समान | (like one's ownself) |
| भूतम् | = | प्राणी | (creature) |
| पण्डितः | = | विद्वान् | (scholar) |
| –स्था | = | स्थित | (situated) |
| विद्या | = | विद्या | (learning) |
| पर-हस्त-गत | = | दूसरे के हाथ में गया हुआ | (gone to other's hand) |
| समुत्पन्न | = | उत्पन्न | (created) |
| आभरणम् | = | आभूषण | (ornament) |
| क्षमा | = | क्षमा | (forgiveness) |
| कोकिला | = | कोयल | (cuckoo) |
| नारी | = | स्त्री | (woman) |
| पतिव्रतम् | = | पति-व्रत | (devotion to husband) |
| कुरूप | = | कुरूप | (ugly) |
| तपस्विन् | = | तपस्वी | (ascetic) |
| चक्रम् | = | पहिया | (wheel) |
| रथः | = | रथ | (chariot) |
| गतिः | = | गति, चाल | (motion) |
| पुरुषकार | = | परिश्रम | (effort) |
| दैवम् | = | भाग्य | (fate) |
| निशा | = | रात | (night) |
| वि+भा | = | सुशोभित होना | (to shine) |
| नभस् | = | आकाश | (sky) |
| पयस् | = | पानी | (water) |
| सरस् | = | सरोवर | (pool) |

उपसर्ग-युक्त धातुः वि+भा (2)

रूपाणि

मातृ (पृष्ठ 95)

नारी–'नदी' के समान (like नदी), (पृष्ठ 94)
तपस्विन्–'शशिन्' के समान (like शशिन्), (पृष्ठ 95-96)
नभस्, पयस्, सरस्, (पृष्ठ 96)

विशेषणानि

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| पण्डितः | पण्डिता | पण्डितम् |
| –स्थः | –स्था | –स्थम् |
| –गतः | –गता | –गतम् |
| समुत्पन्नः | समुत्पन्ना | समुत्पन्नम् |
| कुरूपः | कुरूपा | कुरूपम् |
| तपस्वी | तपस्विनी | तपस्वि |

विशेषः 'दार' शब्द का अर्थ पत्नी' है परन्तु इसका प्रयोग सदा पुँल्लिग बहुवचन में होता है–दाराः (The word दार, though meaning 'wife', is always used in masc. plural— दाराः)

**अभ्यासः**

मौखिकम्

1. इस पाठ के कोई दो श्लोक कण्ठस्थ कीजिये और सुनाइए (Memorize any two verses from this lesson and recite them).

2. अन्तर स्पष्ट कीजिए (Tell the difference)—
देवः–दैवम्, पुरुषः–पुरुषकारः, गन्तृ–गन्त्री, गम्–गमय् ।

लिखितम्

3. निर्दिष्ट रूप बताइए (Give the indicated form)—

नभस् (द्वितीया) ..........................

पयस् (पञ्चमी) ..........................

सरस् (सम्बोधन) ..........................

तपस्विन् (षष्ठी) ..........................

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—

(क) आकाश में चन्द्रमा सुशोभित होता है । (The moon looks beautiful in the sky.)

(ङ) राम की पत्नी सीता भी वन को गईं । (Rama's wife Sita also went to the forest.) □□



*Teaching Point :*

(i) भवत्-*(pronoun)* (ii) ज्ञा-धातुः

द्वाविंशतितमः पाठः

# त्रयः दकाराः

**असुरः उप+दिश् भवत् अक्षरम् दकारः अभिप्रायः साधु किंबहुना इन्द्रियम् बलवत्**



**ईश्वरस्य त्रयः पुत्राः आसन्—देवः मनुष्यः असुरः च । ते त्रयः एव ईश्वरम् उपागच्छन् अवदन् च—भो पितः, उपदिशतु भवान् इति । ईश्वरः क्रमेण त्रीन् एव उपादिशत्, त्रिभ्यः एव चैतत् अक्षरमेव अकथयत्—'द' इति । उपदेशात अनन्तरं सः त्रीनेव अपृच्छत्—अपि जानीथ दकारस्य अभिप्रायम् इति ।**

**देवः अवदत्—जानामि । 'दमनं कुरु' इति भवतः अभिप्रायः ।**<br>
**मनुष्यः अवदत्—जानामि । 'दानं कुरु' इति भवतः अभिप्रायः ।**<br>
**असुरः अवदत्—जानामि । 'दया कुरु' इति भवतः अभिप्रायः ।**<br>
**ईश्वरः एतत् आकर्ण्य प्रत्यवदत्—साधु! युक्तमेतत् ।**



**किं बहुना–**

**देवानां देवत्वम् इन्द्रियाणां दमने, मनुष्यस्य मनुष्यत्वं दाने, बलवतः असुरस्य च बलं दयायामस्ति ।**

## शब्दार्थाः

| | | | |
|---|---|---|---|
| मनुष्यः | = | मनुष्य | (man) |
| असुरः | = | राक्षस | (demon) |
| उप+दिश् | = | उपदेश देना | (to advise) |
| भवत् | = | आप | (you—*respectful*) |
| अक्षरम् | = | वर्ण | (letter) |
| ज्ञा | = | जानना | (to know) |
| दकारः | = | 'द' अक्षर | ('द' letter) |
| अभिप्रायः | = | अर्थ | (meaning) |
| दमनम् | = | नियन्त्रण | (control) |
| साधु | = | शाबाश! | (well done!) |
| किं बहुना | = | संक्षेप में | (in short) |
| देवत्वम् | = | देवत्व | (godliness) |

| | | | |
|---|---|---|---|
| इन्द्रियम् | = | इन्द्रिय | (sense) |
| मनुष्यत्वम् | = | मनुष्यता | (human-ness) |
| बलवत् | = | बलवान् | (strong) |

धातुः (ज्ञा) (3)

उपसर्गयुक्त-धातुः उप+दिश्

रूपाणि

भवत्, बलवत्–'भगवत्' के समान (like भगवत्), (पृष्ठ 94-95)

अव्ययः साधु

मुहावरा (Idiom) – किं बहुना

विशेषः (i) 'भवत्' शब्द के साथ क्रिया सदा प्रथम पुरुष की आती है (भवत् takes first person verb).

(ii) 'साधु' शब्द के दो अर्थ हैं । देखिए पाठ 1 तथा 22 (The word 'साधु' has two meanings. See Lessons 1 and 22).

(iii) वाक्य के शुरू में 'अपि' शब्द प्रश्नवाचक 'क्या' का बोधक होता है (अपि in the beginning of a makes sentence a yes-no question).

## अभ्यासः

### मौखिकम्

1. 'भवत्' के रूप बोलिए (Decline भवत्) ।
2. 'ज्ञा' धातु के रूप पाँचों लकारों में बोलिए (Conjugate ज्ञा in all the five lakaras).

### लिखितम्

3. निर्दिष्ट रूप लिखिए (Give the indicated forms)—

'ज्ञा' लोट्, प्र० पु० ए० व० .................. .................. ..................

भवत् द्वितीया .................. .................. ..................

भगवत् तृतीया .................. .................. ..................

बलवत् षष्ठी .................. .................. ..................

4. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
   (क) ईश्वरस्य पुत्राः के आसन्?
   (ख) पुत्राः पितरं किमवदन्?
   (ग) पितुः उपदेशः कः आसीत्?
   (घ) दकारस्य अभिप्रायं देवाः मनुष्याः असुराः च किम् अजानन्?

5. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)–
   (क) आप आइए और बैठिए । (You please come and have a seat.)
   (ख) क्या आप सब ने नाटक देखा ? (Did all of you see the play?)
   (ग) संक्षेप में, परोपकार ही ईश्वर-वन्दना है । (In short, doing good to others is God's worship.)
   (घ) शाबाश! शाबाश! आपका खेल सुन्दर था । (Bravo! Well done! Your game was beautiful.)
   (ङ) हमने भी तुम्हारा परिचय जाना । (We also came to know about you.)

□□



*Teaching Point :*

(i) सन्धि– अः + अ (ii) पूर्व declension

त्रयोविंशतितमः पाठः

# विवेकानन्दः

**पूर्व वयस् स्नातकः समाधिः तपस् संस्कृतिः प्रशंसितृ यशस् प्र + सृ (सर्) तेजस्विन् श्रद्धावत् कर्मयोगिन्**



**पूर्वस्मिन् वयसि विवेकानन्दस्य नाम नरेन्द्रदत्तः आसीत्। तस्य पिता विश्वनाथदत्तः आसीत्। नरेन्द्रः यदा स्नातकोऽभवत् तदा तस्य पिता परलोकमगच्छत्।**

**एकदा कस्याञ्चित् सभायां नरेन्द्रः रामकृष्ण-परमहंस महोदयस्य स्पर्शमधिगत्य समाधिस्थोऽभवत्। तस्यैव गुरोः स्पर्शेन च तस्य समाधिः समाप्तोऽभवत्। तस्मात् दिनात् नरेन्द्रः तं स्वं गुरुं स्व्यकरोत् तपः चाकरोत्।**

**गुरोः आज्ञां विदित्वा सः सर्वत्र अभ्रमत् भारतीयायाः संस्कृते च प्रचारमकरोत्। 1893-तमे वर्षे अमरीका-देशे 'शिकागो' नाम नगरे विश्व-धर्म-सम्मेलनमभवत्। तत्रापि सोऽगच्छत्। तत्र तस्य भाषणम् आकर्ण्य सर्वे श्रोतारः तस्य**

प्रशंसितारोऽभवन् । तस्य यशः सर्वत्र प्रासरत् । अनेके जनाः तस्य भक्ताः अभवन् । तस्य उपदेशानां सारोऽस्ति एषः–



निर्भयः भव । तेजस्वी भव । श्रद्धावान् भव । कर्मयोगी भव । दरिद्रदेवः भव । राष्ट्रदेवः भव ।

दक्षिण-भारते समुद्रस्य मध्ये पर्वते तस्य मन्दिरमस्ति । अत्रैव सः तपोऽकरोत् । मन्दिरमिदं न प्राचीनम् । 1970-तमे वर्षे अस्माकं राष्ट्रपतिः तस्य उद्घाटनमकरोत् ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| पूर्व | = | पहला | (earlier) |
| वयस् | = | आयु | (age) |
| स्नातकः | = | स्नातक | (graduate) |
| परलोकः | = | परलोक | (the other world) |
| सभा | = | सभा | (meeting) |
| स्पर्शः | = | छूना | (touch) |
| समाधिः | = | समाधि | (trance, meditation) |
| समाप्त | = | समाप्त | (finished) |
| तपस् | = | तपस्या | (penance) |
| संस्कृतिः | = | संस्कृति | (culture) |
| प्रचारः | = | प्रचार | (propagation) |
| भाषणम् | = | भाषण | (speech) |

| | | | |
|---|---|---|---|
| प्रशंसितृ | = | प्रशंसा करने वाला | (admirer) |
| यशस् | = | यश | (fame) |
| प्र+सृ (सर्) | = | फैलना | (to spread) |
| निर्भय | = | निडर | (fearless) |
| तेजस्विन् | = | तेजस्वी | (illustrious) |
| श्रद्धावत् | = | श्रद्धालु | (full of faith) |
| कर्मयोगिन् | = | कर्मयोगी | (one who believes in selfless action) |
| दरिद्रदेवः | = | ग़रीबों को देवता मानने वाला | (one whose god is the poor) |
| समुद्रः | = | समुद्र | (ocean) |
| मध्यः | = | बीच | (middle) |
| मन्दिरम् | = | मन्दिर | (temple) |
| उद्घाटनम् | = | उद्घाटन | (inauguration) |

उपसर्ग-युक्त धातुः प्र + सृ (सर्) (2)

रूपाणि

पूर्व—किम् के समान (थोड़े अन्तर के साथ) (like किम् with a slight difference), (पृष्ठ 96-97)

वयस्, तपस्, यशस्—'पयस्' के समान (like पयस्), (पृष्ठ 96)

प्रशंसितृ—'दातृ' के समान (like दातृ), (पृष्ठ 95)

तेजस्विन, कर्मयोगिन्—'शशिन्' के समान (like शशिन्), (पृष्ठ 95-96)

श्रद्धावत्—'भगवत्' के समान (like भगवत्) (पृष्ठ 94-95)

विशेषणानि

| पुं० | स्त्री० | नपुं० |
|---|---|---|
| समाप्तः | समाप्ता | समाप्तम् |
| प्रशंसिता | प्रशंसित्री | प्रशंसितृ |
| निर्भयः | निर्भया | निर्भयम् |
| तेजस्वी | तेजस्विनी | तेजस्वि |
| श्रद्धावान् | श्रद्धावती | श्रद्धावत् |
| —देवः | —देवी | —देवम् |

मुहावरा (Idiom) पूर्वस्मिन् वयसि

## अभ्यासः

### मौखिकम्

1. श्रद्धावत्, मातृवत् (परदारेषु)–इन दोनों शब्दों में 'वत्' के अर्थ में क्या अन्तर है (What is the difference in the meaning of these two uses of वत्) ?

### लिखितम्

2. सन्धि या सन्धिविच्छेद कीजिए (Join or disjoin)—
गजो ऽस्ति, बालः + अकरोत्, छात्रो ऽवदत्, स्नातकः + अभवत्,विवेको ऽभ्रमत् ।

3. संस्कृत में उत्तर दीजिए (Answer in Sanskrit)—
   (क) पूर्वस्मिन् वयसि विवेकानन्दस्य किं नाम आसीत् ?
   (ख) विवेकानन्दः समाधिस्थः कथमभवत् ?
   (ग) अमरीका-देशे तस्य भाषणं कुत्राभवत् ?
   (घ) विवेकानन्दः तपः कुत्राकरोत् ?

4. संस्कृत में अनुवाद कीजिए (Translate into Sanskrit)—
   (क) हे बालिके, राष्ट्र को देवता मानो! (Oh girl, look upon your country as your deity.)
   (ख) भारत में बहुत तेजस्वी स्त्रियाँ पैदा हुईं । (In India, many illustrious women were born.)
   (ग) बचपन में ही उन्होंने यश पाया । (In childhood itself, they attained glory.)
   (घ) मित्रो,निर्भय बनो, श्रद्धावान बनो। (Friends, be fearless. be full of faith.

□□



*Teaching Point :*

(i) तम् suffix

# चतुर्विंशतितमः पाठः

# पत्रम्-पितरं प्रति

छात्रवासः अचिरम् सज्जा दूरी + भू स्नेहिन् श्रीमत् घोषय् सूच् (सूचय्) तदर्थम् धनादेशः वशंवद



छात्रावासतः,
नवदिल्लीतः ।
29-2-92

पूजनीयाः पितृचरणाः,

सादरं नमामि । अत्र कुशलं, तत्रास्तु ।

मम वार्षिकी परीक्षा अचिरमेव भविष्यति । अप्रैल-मासस्य पञ्चम-दिवसतः तस्याः उपक्रमः भविष्यति । तस्यै मम सज्जा अपि पूर्णा । केवलं गणित-विषये काचित् न्यूनता अस्ति, परं सा न्यूनता अपि अचिरमेव दूरीभविष्यतीति आशा । मम आचार्याः अतीव सहायकाः स्नेहिनः च । श्रीमतां च मातृचरणानाम् च आशीर्वादम् अधिगन्तुम् अहमेतत् पत्रं लिखामि ।

मई-मासस्य प्रथमे दिवसे अस्माकं प्राचार्यः परिणामं घोषयिष्यति । परिणाममहं भवते अचिरमेव सूचयिष्यामि । मई-मासस्य पञ्चदश-दिवसतः अस्माकं ग्रीष्मावकाशः भविष्यति । तदैव गृहमागमिष्यामि । तदर्थं धनस्य आवश्यकता भविष्यति । अतः कृपया पञ्चाशत् रूप्यकाणि धनादेशेन प्रेषयन्तु भवन्तः ।

अम्बायै माधवाय च मम नमस्कारः ।

वशंवदः—
शचीन्द्रः

## शब्दार्थाः

| | | | |
|---|---|---|---|
| प्रति | = | की ओर, को | (toward, to) |
| नव | = | नया | (new) |
| छात्रावासः | = | छात्रावास | (hostel) |
| –चरण | = | आदरणीय | (respected) |
| सादरम् | = | आदर के साथ | (respectfully) |
| कुशलम् | = | कुशल-मंगल | (well-being) |
| वार्षिक | = | वार्षिक | (yearly) |
| परीक्षा | = | परीक्षा | (examination) |
| अचिरम् | = | जल्दी | (soon) |
| पञ्चम | = | पाँचवाँ | (fifth) |
| सज्जा | = | तैयारी | (preparation) |
| पूर्ण | = | पूरा | (complete) |
| न्यूनता | = | कमी | (deficiency) |
| दूरी+भू | = | दूर होना | (to go away) |
| आशा | = | आशा | (hope) |
| सहायक | = | सहायता करने वाला | (helper) |
| स्नेहिन् | = | स्नेह करने वाला | (affectionate) |
| श्रीमत् | = | श्रीमान् | (you—*respectful*) |
| आशीर्वादः | = | आशीर्वाद | (blessing) |
| घोषय् | = | घोषणा करना | (to announce) |
| सूच् (सूचय्) | = | सूचित करना | (to inform) |
| ग्रीष्मावकाशः | = | गर्मी की छुट्टियाँ | (summer vacation) |
| तदर्थम् | = | उसके लिए | (for that) |
| आवश्यकता | = | ज़रूरत | (need) |
| धनादेशः | = | मनी-आर्डर | (money-order) |
| प्रेषय् | = | भेजना | (to send) |
| नमस्कारः | = | नमस्कार | (regards) |
| वशंवद | = | आज्ञाकारी | (obedient) |

**धातवः**

घोषय् (1)　　दूरी + भू (2)
सूच् (सूचय्) (२)　　प्रेषय् (1)

